विषयसूचिका

ॐ

श्रीपाञ्चरात्रे महोत्सवप्रयोगः

श्रीशं शङ्खगदासिपंकजधरं ब्रह्माणमब्जासनं
योगीन्द्रं कपिलं द्विजिह्वनृपतिं पद्मं ससंवर्तकम् ।
कण्वं सर्वमुनीन्द्रसंस्तुतपदाम्भोजं समस्तान् गुरून्
श्रीविष्णवागमसारसिंधुकलशीडिम्भानदम्भान् भजे ॥

श्रीरंगराजः कुरुते केशवार्यतनूद्भवः ।
महोत्सवप्रयोगं तु सर्वतन्त्रसमुद्धृतम् ॥

अथ महोत्सवविधिरुच्यते ॥ आचार्यो मौहूर्तिकैस्सह तीर्थर्क्षं निश्चित्य तदनुसारेण नवाहमुत्सवं संकल्प्य, ध्वजादिवासपूर्वेद्युर्भगवद्यागसिद्ध्ये स्वयं वपनपूर्वकं स्नात्वालंकृतस्सायंकाले मूर्तिपैः सह स्वनित्यकर्म निर्वर्त्य विविधभूषणनूतनवस्त्रसितोष्णीषोत्तरीयचित्रमाल्यैरलंकृतो भगवन्मंदिरं प्रविश्य सायंतनार्चनानंतरं फलपुष्पचंदनतांबूलदक्षिणाक्षतादीन् पात्रे विन्यस्य आदाय भगवदभिमुखं स्थित्वा ॐ नमस्सदसे इत्यादि पठित्वा दण्डवत्प्रणम्य सभ्यान् पंचकालपरायणान् श्रीवैष्णवोत्तमान् गन्धपुष्पफलतांबूलदक्षिणाक्षतादिभिस्तोषयित्वा अशेषे हे परिषत् भवत्पादमूले मया समर्पितामिमां सौवर्णीमल्पीयसीमपि यथोक्तदक्षिणामिव स्वीकृत्य अस्य श्रीदेवदेवस्य भगवतो नारायणस्य नवाहोत्सवकर्म कर्तुं मम योग्यतासिद्धिमनुग्रहाणेति प्रार्थ्य, योग्यतासिद्धिरस्त्विति तैरनुज्ञातस्स्वासने समुपविश्य पवित्रपाणिः प्राणानायम्य, शुक्लांबरधरं . . विघ्नोपशांतये ॥ यस्य द्विरद . . आश्रये ॥ दिव्याकारं . . उपास्महे ॥ ॐ नवाहोत्सव-

कर्मणो निर्विघ्नेन परिसमाप्त्यर्थमादौ श्रीविष्वक्सेनाराधनं करिष्ये इति संकल्प्य ॐ भगवानेव स्वशेषभूतेन मया स्वीयैरेव कल्याणतमैरेवौपचारिकसांस्पर्शिकाभ्यवहारिकैर्भोगैस्सर्वपरिच्छदान्वितमात्मानं प्रीतं कारयितुमुपक्रमत इति कर्मारंभमन्त्रं बलमन्त्रं चाप्यनुसंधाय ततो विष्वक्सेनसन्निधिं गत्वा तमर्घ्यादिभिरभ्यर्च्य पुनस्स्वासने समुपविश्य प्राणानायम्य देशकालौ संकीर्त्य मम शरीरशुद्ध्यर्थं पुण्याहवाचनं करिष्ये इति संकल्प्य शोधिते भूतले स्वपुरतो धान्यपीठं परिकल्प्य तदुपरि सौवर्णं राजतं ताम्रं वा करकं सुगन्धोदकपूरितं रत्नहाटककूर्चस्रग्वस्त्रपल्लवसंयुतं चंदनाद्युपलिप्तं नाळिकेरशिरस्कं विन्यस्य कुंभस्य चतुर्दिक्षु चतुरो मूर्तिपान्विन्यस्य तेषां हस्तेषु प्रागादिक्रमेण ओमाप इत्यपो दत्वा शिवास्त आपस्सन्त्विति तैः प्रत्युक्ते ओं गन्धा इति गन्धान् दत्वा सुगन्धाः पान्त्विति तैः प्रत्युक्ते ओं सुमनस इति पुष्पाणि दत्वा सौमनस्यमस्त्विति तैः प्रत्युक्ते ओमक्षता इत्यक्षतान् दत्वा अक्षतं चारिष्टं चास्त्विति तैः प्रत्युक्ते ओं दक्षिणा इति दक्षिणां दद्यात् । स्वस्ति दक्षिणाः पान्त्विति ते प्रतिब्रूयुः । एवं साधकान् अर्घ्यादिदक्षिणान्तमभ्यर्च्य ओं दर्भा इति जपार्थं तेषां हस्तेषु दर्भान् दत्वा स्वस्ति दर्भाः पान्त्विति तैः प्रत्युक्ते करके भगवते ओं ओं ओं परमधामावस्थित मदनुग्रहकाम्ययोद्यतावतारेहाभिमतसिद्धिदमन्त्रशरीरों नमोनमः । सहस्रारहुं फट् । भगवन् सुदर्शन आगच्छागच्छ स्वाहेति सुदर्शनमावाह्य षडक्षरेणार्घ्यादिभिरभ्यर्च्य साधकैस्सह स्वयं च दर्भैः कलशं स्पृशन् ॐ भवद्भिरनुज्ञातः पुण्याहं वाचयिष्ये इत्युक्त्वा वाच्यतामिति तैः प्रत्युक्ते ॐ भगवान् पवित्रं वासुदेवः पवित्रं तत्पादौ पवित्रं तत्पादोदकं पवित्रम् । ओं तत्सत्पुण्याहं भवन्तो ब्रुवन्त्वित्युक्त्वा पुण्याहमस्त्विति प्रत्युक्ते । ओं तत्सवितुः वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । ओं नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ।

ॐ एकपदी द्विपदी त्रिपदी चतुष्पद्यस्यविपदसि न हि पद्यसे नमस्ते तुरीयाय दर्शिताय पदाय परोरजसे असावदोमाप्रपतत् । एष सा परा प्रकृतिरेष तत्परंब्रह्मैष प्रभव एषो ऽव्यय एष आत्मा चतुर्विधः सर्वज्ञस्सर्वदर्शी सर्वेश्वर स्सर्वशक्तिसमृद्धिमानेव ग्रन्धिरासो वशी स्वाधीनोऽनादिरनन्तः व्यपगतनिद्राभयक्रोधतंद्री व्यपगतेच्छातमःक्रम-व्याधिनिर्दोषो निरधिष्ठो निरवद्यः ये भगवन्तं वासुदेवमेवं विदु र्यें नैवं विदु र्न ते विदुः । एषाकृतिरेष भगवान् वासुदेवः एषाकृतिरेष भगवान् सङ्कर्षणः एषाकृतिरेष भगवान् प्रद्युम्न एषाकृतिरेष भगवान् अनिरुद्धः ।

ॐ शुद्धयेऽस्तु परो देवो वासुदेवोऽस्तु शुद्धये । सङ्कर्षणश्शुद्ध-येऽस्तु प्रद्युम्नश्चास्तु शुद्धये ॥ शुद्धयेस्त्वनिरुद्धोऽपि केशवश्चास्तु शुद्धये । नारायणोऽस्तु विश्वेशः शुद्धये सर्वकर्मसु । शुद्धये माधवश्चास्तु सर्व-लोकहिते रतः । गोविन्दश्शुद्धये चास्तु परमात्मा सनातनः । शुद्धये विष्णुरस्त्वाद्यश्शुद्धये मधुसूदनः । सर्वलोकहितो देवश्शुद्धयेऽस्तु त्रिविक्रमः ॥ वामनश्शुद्धये चास्तु श्रीधरोद्यास्तु शुद्धये । शुद्धयेऽस्तु हृषीकेशः पद्मनाभोऽस्तु शुद्धये ॥ सदा दामोदरो देव श्शुद्धयेऽस्तु जगत्पतिः । शुद्धये पद्मनाभोऽस्तु शुद्धयेऽस्तु सदा ध्रुवः ॥ अनन्तः शुद्धये चास्तु शक्त्यात्मा चास्तु शुद्धये । सर्वकर्मसु चैवास्तु शुद्धये मधुसूदनः ॥ सदा विद्याधिदेवोऽस्तु शुद्धये कपिलस्तथा । शुद्धये विश्वरूपोऽस्तु शुद्धयेऽस्तु विहङ्गमः ॥ क्रोडात्मा शुद्धये चास्तु शुद्धये बडबाननः । शुद्धयेऽस्तु सदा धर्मश्चास्तु वागीश्वरस्तथा ॥ देव एकार्णवशयश्शुद्धयेऽस्तु निरन्तरम् । शुद्धयेऽस्तु सदा देवः कूर्मः पाताळधारकः ॥ वराहश्शुद्धये चास्तु नारसिंहोऽस्तु शुद्धये । अमृता-हरणश्चास्तु शुद्धये सर्वकर्मणाम् ॥ श्रीपतिश्शुद्धये चास्तु कान्तात्मा चास्तु शुद्धये । शुद्धये राहुजिच्चास्तु कालनेमिघ्न एव च ॥ पारिजात-

हरश्चास्तु लोकनाथोऽस्तु शुद्धये । सर्वत्र शुद्धये चास्तु दत्तात्रेयो महाप्रभुः ॥ न्यग्रोधशायी भगवान् शुद्धये चास्तु सर्वदा । एकशृङ्गतनुश्चास्तु वामनश्चापि शुद्धये ॥ त्रिविक्रमश्शुद्धयेऽस्तु शुद्धयेऽस्तु नरस्सदा । नारायणश्शुद्धयेऽस्तु हरिः कृष्णश्च शुद्धये ॥ ज्वलत्परशुधृग्रामः शुद्धयेऽस्तु धनुर्धरः । रामश्च शुद्धये चास्तु वेदविद्भगवांस्तथा ॥ शुद्धयेऽस्तु सदा कल्की सर्वदोषक्षयाकरः । शुद्धयेऽस्तु सदा देवः पाताळशयनः प्रभुः ॥ शुद्धये सन्तु सर्वेषां सर्वे सर्वत्र सर्वदा । एते सर्वे सदा देवाश्शान्तये सन्तु पूजिताः ॥ ऋद्धये पुष्टये सन्तु सिद्धये भक्तयेऽपि च । शिवाय मुक्तये सन्तु वृद्धये सर्वकर्मणाम् ॥ मन्त्राणां देशिकानां च स्थानानामपि सर्वदा । पुत्रमित्रकळत्राणां दासीदासव्रतामपि ॥ वेदशास्त्रागमादीनां व्रतानामिष्टसंपदाम् । मनोरथानां सर्वेषां हितानां सन्तु सर्वदा ॥ आयुष्यारोग्यमेधानां धनधान्यादिसंपदाम् । पुण्यानामणिमादीनां गुणानां श्रेयसामपि ॥ राज्ञो जनपदस्यापि यजमानस्य मन्त्रिणाम् । वैष्णवाणां विशेषेण परत्र हितमिच्छताम् ॥ पंचकालविशुद्धानां सत्त्वस्थानां शुभात्मनाम् । स्वस्त्यस्तु च शिवं चास्तु शुभं चापि पुनःपुनः ॥ अविघ्नमनिशं चास्तु दीर्घमायुष्यमस्तु नः । समाहितमनश्चास्तु संपदश्चोत्तरोत्तरम् ॥ पुण्याहं शुद्धये चास्तु वासुदेवादिमूर्तयः । शंखचक्रगदापद्मयुक्तस्सर्वेश्वरेश्वरः । प्रीयतां भगवान् देवो लाङ्गली प्रियतां सदा । प्रद्युम्नः प्रियतां नित्यं अनिरुद्धस्सुरेश्वरः ॥ नारायणस्सुरेशोऽस्तु कर्मणां पूरणाय च । न्यूनाधिकानां शान्त्यर्थं प्रियतां प्रियतां विभुः ॥ इति साधकैस्सह पठित्वा ओं कर्मणः पुण्याहं भवन्तो ब्रुवन्त्वित्युक्त्वा पुण्याहं कर्मणोस्त्विति तैः प्रत्युक्ते संप्रदायात् ओं शान्तिरस्तु ओं पुष्टिरस्तु ओं तुष्टिरस्तु ओं वृद्धिरस्तु अविघ्नमस्तु आयुष्यमस्तु आरोग्यमस्तु ऐश्वर्यमस्तु शिवं कर्मास्त्विति प्रतिवाक्यं करकस्थजलं कूर्चेन पात्रान्तरे निषिच्य साधकहस्तस्थितदर्भानादाय प्रागग्रं करकोपरि विन्यस्य पात्रान्तरस्थं

जलं दक्षिणहस्तेन दर्भोपरि करके निषिच्य तज्जलेन ओं शतधारं सहस्रधारमपरिमितधारमच्छिद्रमनन्तमपरिमितमरिष्टमच्युतमक्षयं परमं पवित्रं भगवान् वासुदेवः पुनातु। इति मन्त्रेण, स्थानानि देशानि सहस्रबाहुर्वरेण्यनामा विरजांसिनामा। तेभ्यो नमस्ते मधुसूदनाय तत्राभिमानं परिरक्षयन्तम् ॥ इत्येकायनमन्त्रेण चात्मानं प्रोक्ष्य प्राणानायम्य देशकालौ सङ्कीर्त्य मम शरीरशुद्ध्यर्थं गोदानं यत्किञ्चित् हिरण्यदानं वा करिष्य इति संकल्प्य हिरण्यमादाय,

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ इदं हिरण्यं मम शरीरशुद्ध्यर्थं तुभ्यमहं संप्रददे न ममेति सोदकं हिरण्यं कस्मैचिद्ब्राह्मणाय दत्वा ततो गर्भगेहान्तः प्रविश्य स्वासने समुपविश्य करशुद्धिदिग्बन्धनभूतशुद्ध्यादिमानसयागान्तं कृत्वा देवं मान्त्रासनिकोपचारैरभ्यर्च्य स्नानासने नीत्वा तदीयोपचारैरभ्यर्च्य स्नपनार्चां नवकलशैरभिषेचयेत्।

तत्प्रकारः ॥ देवस्य पुरतः प्रागग्राणि चत्वारि उदगग्राणि चत्वारि सूत्राण्यास्फाल्य तेषु नवकोष्ठेषु यथाविधि धान्यपीठं परिकल्प्य यथाविधि कलशानधिवास्य, प्रागादिकोष्ठेषु कलशचतुष्टयं आग्नेयादिकोष्ठेषु कलशचतुष्टयं मध्ये कलशमेकं च विन्यस्य प्रागादिकलशचतुष्टयं पाद्यार्घ्याचमनगन्धसर्वौषधिवारिभिरापूर्य आग्नेयाद्यैशान्यान्तं कलशचतुष्टयं दधिक्षीरमधुघृतैरापूर्य मध्यकुम्भं शुद्धोदकेन आपूर्य तेषां पुरतः धान्यपीठे हरिद्राचूर्णं कुम्भं च विन्यस्य तैलोद्वर्तनचूर्णादिकं च तत्रोपकल्प्य कलशेषु कूर्चन्यासादिकं यथाविधि कृत्वा पुण्याहं वाचयित्वा तज्जलेन स्नपनद्रव्याणि संप्रोक्ष्य प्रागादिकलशेषु वासुदेवादीन् ईशानादिपर्यन्तं कलशेषु अनिरुद्धादीन् मध्ये शुद्धोदककलशे श्रीमन्नारायणं हरिद्राचूर्णकुंभे श्रियंदेवीं चावाह्य-

प्रधानकलशैरभिषेचयेत् ।

विष्णुगायत्र्या पाद्येन इदं विष्णुरित्यर्घ्येण त्रीणि पदेत्याचमनेन विष्णोः कर्माणीति सर्वौषध्युदकेन दधिक्राव्णोति दध्ना आप्यायस्वेति क्षीरेण मधुवातेति मधुना शुक्रमसीत्याज्येन श्रीसूक्तेन हरिद्राचूर्णैश्चाभिषिच्य प्रतिकलशं मध्ये मध्ये अर्घ्यपाद्याचमनगन्धस्रग्दीपधूपनैवेद्यानि केवलार्घ्यं वा समर्प्य ततः पुंसूक्तं पठद्भिः ब्राह्मणैस्सह शुद्धोदककलशेन सहस्रधारया देवमभिषिच्य नीराजनादींश्च पूर्ववत्कृत्वा अलङ्कारासनं नीत्वा तदुक्तभोगैर्देवमभ्यर्च्य हविः निवेद्य जपान्तं कृत्वा जितन्तादिस्तोत्रैर्देवं स्तुत्वा पादयोः प्रणम्य तदन्वङ्कुरार्पणं कुर्यात् ।

तदर्थं यथोक्तलक्षणानि पालिकादिपात्राणि संभृत्य वापनयागाख्यमंटपे वापि कुर्यादङ्कुररोपणमिति वचनादुत्तरत्र यागशालालक्षणे उत्तरे चाङ्कुरैर्युक्तामिति वक्ष्यमाणत्वाच्च उत्सवार्थाङ्कुरार्पणस्थानं यागमंटपोत्तरभाग एव परिकल्प्य यथाविधि शोधयित्वालंकृत्य अङ्कुरार्पणोपयुक्तसंभारान् सर्वान् संभृत्य आचार्यो यजमानेन सह गर्भगेहं प्रविश्य भगवन्तं जगद्योनिमभ्यर्च्याभ्यर्थ्य तदनुज्ञयाऽभिनवे सौवर्णे राजते वा पात्रे, तिलसर्षपनीवारशालिमाषप्रियंगवः। कुलुत्थमुद्गनिष्पावयवगोधूमवैणवाः ॥ इत्युक्तद्वादशबीजानि विन्यस्य पृथक्पात्रेषु वा बीजानि विन्यस्य तत्पात्रं दीक्षितस्य विप्रस्य मूर्ध्नि विन्यस्य आचार्यो मूर्तिपैस्सह प्रासादान्तःप्रविश्य तत्राधारोपरि बीजपात्रं निधाय अर्घ्यादिभिर्मूलबिम्बमुत्सवबिम्बादींश्चाभ्यर्च्य बीजपात्रं च अर्घ्यादिभिरभ्यर्च्य देवाय विनिवेद्य शङ्खादिवाद्यघोषैर्मधुरगीतैस्तूर्यनादैः श्रुतिघोषैश्च सह तत्पात्रं दीक्षितस्य परिचारकस्य मूर्ध्नि वाहयित्वा मंदिरप्रादक्षिण्येन तत्पात्रमङ्कुरार्पणस्थाने विन्यसेत् ।

ततो विष्वक्सेनं गरुडं हनूमन्तं हेतीशं वा वस्त्राद्यैरलंकृत्य यानादिके समारोप्य खनित्रं मद्भिःप्रक्षाल्य नवेन वाससा समाच्छाद्य माल्यैः भूषयित्वा परिचारकमूर्ध्नि विन्यस्य ब्राह्मणैर्वैष्णवैश्शूद्रैर्वा विष्वक्सेनं वाहयन् छत्रध्वजपताकाङ्कुरपात्रैर्वेदघोषैश्शङ्खादिवाद्यरवै र्गणिकादेव-दासीभिस्सह सर्वेष्वावरणेषु प्रदक्षिणीकृत्य प्राचीमुदीचीं प्रागुदीचीं वा दिशमदूरं समनुप्राप्य तत्र मनोहरे उद्याने केवले शुचौ देशे वा विष्वक्सेनं भद्रविष्टरे समुपवेश्य पुण्याहं वाचयित्वा अस्त्रमन्त्रेण भुवं संप्रोक्ष्य भुवं स्पृशन् भूसूक्तं जपित्वा एकाग्रचेतसा देवस्य वाराहीं मूर्तिं मनसा ध्यायन् भुवमर्घ्यादिभिरभ्यर्च्य खनित्रमस्त्रमन्त्रेण प्रोक्ष्य मूलमन्त्रेणाभ्यर्च्य खनित्रमादाय प्राङ्मुखस्सन्, ओं यज्ञार्हदेहाय महावराहाय पुराणपुरुषाय प्रजापतये नमः । इति क्रोडमन्त्रेण संप्रदाय, उद्धृतासीति मन्त्रेण च खनित्रेण मृदं उद्धृत्य लोहजे वेत्रजे वा पात्रे मृदं निधाय मूलमन्त्रेण नवेन वाससाऽच्छाद्य पुण्याहप्रोक्षण-पूर्वकं नदीतीराद्वालुकां गोष्ठाद्गोकरीषं च संगृह्य पात्रद्वये निधाय वस्त्राभ्यामाच्छाद्य यानादिके समारोप्य परिचारकाणां मूर्धसु वाह-यित्वा ग्रामप्रादक्षिण्येन यागमंटपं प्रविश्य विष्वक्सेनं स्वस्थाने संनिवेश्य ततोऽङ्कुरार्पणस्थाने गोमयाद्युपलिप्ते सुधाचूर्णाद्यलंकृते भूतले चन्दनार्द्राणि सूत्राणि प्रागायतानि सप्तदश उदगायतानि चतुर्दश-षोडशाङ्गुलसंमितकोष्ठं यथा भवति तथाऽऽस्फाल्य पूर्वपश्चिमपङ्क्तिषु त्रयोदशसु पालिकादिस्थापनार्थं मध्ये पङ्क्तित्रयं स्थाप्य तदुभयपार्श्वयोः वीथ्यर्थं पङ्क्तिद्वयं द्वयं विसृज्य वीथेरुभयपार्श्वयोः चतुष्टयं स्थाप्य आग्नेयभागे दक्षिणे नैरृते च स्थितेषु द्वादशद्वादशकोष्ठेषु पालिकाः वारुणे ब्राह्मे ऐन्द्रे च घटिकाः मारुते सौम्ये ईशाने च शरावांश्च स्थापयेत् । प्रत्येकं पालिकादीनां षोडशकल्पने प्रागायतानि सप्तदश दक्षिणोत्तरायतानि पञ्चसूत्राणि निपात्य दक्षिणस्यां दिशि पङ्क्ति-चतुष्टयं स्थाप्य तदुत्तरतः पङ्क्तिद्वयं विसृज्य मध्ये चतुष्टयं स्थाप्य

ततोऽप्युत्तरतः पङ्क्तिद्वयं विमृज्य सर्वोत्तरतः पङ्क्तिचतुष्टयं स्थापयेत्। तत्र दक्षिणदिक्स्थिते पङ्क्तिचतुष्के पालिकाः मध्ये पङ्क्तिचतुष्केषु घटिकाः, उत्तरे पंक्तिचतुष्के शरावांश्च न्यसेत्। प्रत्येकं पालिकादीनां द्वादशकल्पने प्रागायतानि सप्तदश उदगायतानि चत्वारि सूत्राणि निपात्य दक्षिणे पंक्तिचतुष्टयं स्थाप्य, तदुत्तरतः पंक्तिद्वयं विमृज्य, मध्ये चतुष्टयं स्थाप्य तदुत्तरतः पंक्तिद्वयं विमृज्य, सर्वोत्तरतः पंक्तिचतुष्टयं स्थाप्य दक्षिणभागस्थद्वादशकोष्ठेषु पालिकाः मध्यभागस्थेषु घटिकाः उत्तरभागस्थेषु शरावांश्च आग्नेयादीशानान्तं स्थापयेत्। आग्नेयादीशानान्तं न्यासक्रमस्तु आग्नेयादिनैर्ऋतान्तं कोष्ठचतुष्टये पूर्वं वारुणादिपूर्वान्तं कोष्ठचतुष्टये तदनन्तरं वायव्यमारभ्य ईशानान्तं कोष्ठचतुष्टये पश्चान्न्यसेत्। पूर्वत्र पक्षद्वयेऽपि पालिकादीन् एवमेवाग्नेयादीशानान्तं न्यसेत्। प्रत्येकं पालिकादीनामष्टकल्पने प्रागायतानि सूत्राणि सप्तदश दक्षिणोत्तरायतानि सूत्राणि निपात्य दक्षिणस्यां दिशि भागाष्टकं संस्थाप्य, वीथ्यर्थं भागचतुष्टयं विमृज्य, मध्ये भागाष्टकं संस्थाप्य, तदुत्तरतो भागचतुष्टयं विमृज्य, सर्वोत्तरतो भागाष्टकं संस्थाप्य दक्षिणभागाष्टके पालिकाः मध्यभागाष्टके घटिकाः उत्तरभागाष्टके शरावांश्च न्यसेत्। प्रत्येकं पालिकादीनां चतुष्टयकल्पने दक्षिणोत्तरायतानि त्रीणि सूत्राणि पूर्वपश्चिमायतानि एकादश सूत्राणि निपात्य दक्षिणतः कोष्ठचतुष्टयं स्थाप्य तदनन्तरं वीथ्यर्थं भागचतुष्टयं विमृज्य मध्ये कोष्ठचतुष्टयं स्थाप्य पुनश्च भागचतुष्टयं विमृज्य सर्वोत्तरतो भागचतुष्टयं स्थाप्य पालिकादीन् क्रमेण विन्यसेत्। केवलपालिकानां षोडशकल्पने दक्षिणोत्तरायतानि पञ्चसूत्राणि पूर्वपश्चिमायतानि पञ्चसूत्राणि च निपात्य तेषु षोडशकोष्ठेषु केवलपालिका एव विन्यसेत्। केवलपालिकानामष्टकल्पने पूर्वपश्चिमायतानि पञ्चसूत्राणि दक्षिणोत्तरायतानि त्रीणि च निपात्य केवलपालिकाः स्थापयेत्। केवलपालिकानां चतुर्विंशतिकल्पने पूर्वपश्चिमसूत्राणि

सप्त दक्षिणोत्तरसूत्राणि पञ्च च निपात्य तेषु केवलं चतुर्विंशति-पालिकाः स्थापयेत् । केवलपालिकानां चतुष्टयकल्पने दक्षिणोत्तराणि त्रीणि सूत्राणि पूर्वपश्चिमानि त्रीणि निपात्य तेषु चतुःकोष्ठेषु केवलं चतुःपालिकाः स्थापयेत् । एवं विभवेच्छानुसारेण सूत्राण्यास्फाल्य पालिकादीनां कोष्ठेषु प्रतिकोष्ठं आढकमितैः तदर्धैस्तदर्धैर्वा शालिभिः व्रीहिभिर्वा वृत्तं चतुरश्रं वा पीठं परिकल्प्य पालिकादीनि पात्राणि मूलमन्त्रेण प्रक्षाळ्य सहदेवीपूर्वाश्वत्थपल्लवशिरीषहरिद्रापत्राणि च पालिकादीनां कण्ठे परितो बध्वा कुशकाशतृणैस्तेषां बिलमूलान्यापूर्य बिलानि प्रथमं मृद्भिः, तदनन्तरं वालुकाभिस्तदनन्तरं करीषचूर्णैरापूर्य यद्वा मृदादिकं सर्वं संमिश्र्य तेनापूर्य तानि पालिकादीनि पूर्वोक्त-क्रमेण मध्यमस्कन्धमारभ्य ईशानान्तं प्रतिस्कन्धं पूर्वोक्तरीत्या आग्नेयादीशानान्तं क्रमेण विन्यस्य पालिकादीन् प्रत्येकं नवैर्वासोभिः अशक्तौ प्रतिस्कन्धं वाससाऽच्छाद्य पालिकादीनां पश्चिमे देशे व्रीहि-तण्डुलतिलैः परिकल्पिते धान्यपीठे सूत्रवेष्टितं सलक्षणं गन्धोदकपूर्णं प्रतिमारत्नकूर्चाश्वत्थपल्लववस्त्रसहितं सकरकं सोपकुंभाष्टकं सोमकुंभं निधाय घटिकास्थानात् पश्चिमे भागे यथोक्ते आसने आचार्यः प्राङ्मुख उपविश्य करशुद्ध्यादिमानसयागान्तं कृत्वा प्रोक्षणार्घ्यं परिकल्प्य देहविन्यस्तमन्त्रानर्घ्यादिनाऽभ्यर्च्य वक्ष्यमाणप्रकारेण तोरण-ध्वजद्वारकुम्भाधिदेवादीनभ्यर्च्य पुण्याहं वाचयित्वा तज्जलेन पालि-कादीन् संप्रोक्ष्य पालिकाद्यधिदेवार्चनं कुर्यात् ।

दक्षिणतः पालिकास्कन्धे अब्जनाभं मध्यतो घटिकास्कंधे पद्मनाभं उत्तरतश्शरावस्कन्धे ध्रुवं च क्रमेणाभ्यर्च्य पालिकानां द्वादशके वह्न्यादीशानान्तमनन्तादिद्वादशकं प्रणवादिनमोन्तैस्तत्त-न्नामभिरभ्यर्च्य घटिकाद्वादशके कूर्मादिद्वादशकमभ्यर्च्य शरावद्वा-दशके एकशृङ्गादिद्वादशकमभ्यर्च्य प्रत्येकपालिकादीनां षोडशकल्पने

पालिकादिषु पूर्वोक्तानन्तादिपाताळशयनान्तान् षट्त्रिंशद्देवान्,— लक्ष्मीपुष्टिर्दयानिद्राक्षमाक्षान्तिस्सरस्वती । धृतिर्मैत्रीरतिस्तुष्टिर्मतिश्च द्वादश स्मृताः ॥ इत्युक्तलक्ष्म्यादिमतिपर्यन्तं शक्तिद्वादशकं च यजेत् । प्रत्येकं पालिकादीनां षट्त्रिंशत्परिकल्पने, षट्त्रिंशत्पालिकासु स्वप्नपदस्थितं वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धचतुष्टयं जाग्रत्पदस्थितं वासुदेवाद्यनिरुद्धान्तमनिरुद्धादिवासुदेवान्तमष्टकं केशवादिद्वादशकं श्रियादिमहिमान्तं तच्छक्तिद्वादशकमाहत्य षट्त्रिंशद्देवताः घटिकानुपूर्वोक्तानन्तादिपाताळशयनान्ताष्षट्त्रिंशद्देवताश्शरावेषु,— स्वधा च विद्यारण्या च मायामूर्तिश्च ह्रीस्तथा । श्रीः कलापी च विद्युच्च निष्ठा ऋक्च रुचिस्तथा ॥ इष्टा शोभा च शुद्धिश्च विभूतिर्भूतिरेव च । व्याप्तिर्गतिश्च सुतिश्च भागा वागीश्वरी रतिः ॥ सिद्धिर्नीतिः प्लुतिः क्रीडा संपत्कीर्तिश्शिखा मतिः । गायत्री चापि मर्यादा हृष्टिश्चेत्युक्तचतुस्त्रिंशच्छक्तयः चक्रं शङ्खं च आहत्य षट्त्रिंशद्देवताश्च सर्वत्र आग्नेयादिक्रमेणार्घ्यादिभिर्यजेत् । पालिकादीनां प्रत्येकमष्टकल्पने केशवादयो द्वादश । तच्छक्तयः श्रियादयो द्वादश । आहत्य चतुर्विंशतिदेवताः यथाक्रमं पालिकाद्यष्टकत्रये यजेत् । पालिकादीनां प्रत्येकं चतुष्टयपक्षे केशवादीन् यथाक्रमं पालिकादिचतुष्टयत्रिके यजेत् । केवलपालिकानां षोडशकल्पने वासुदेवादीन् चतुरः केशवादीन् द्वादश यजेत् । केवलपालिकानामष्टकल्पने वासुदेवादीन् प्रतिलोम्येनानिरुद्धादीन्यथाक्रमं यजेत् । केवलपालिकानां चतुष्टयकल्पने वासुदेवादीन् यजेत् । एवं तत्तत्पक्षानुसारेण पालिकाद्यधिदेवतास्समभ्यर्च्य सोमकुंभार्चनं कुर्यात् ।

मध्यकुम्भे सोमात्मानं भगवन्तं करके सुदर्शनं दिक्कलशेषु इन्द्रादीन् समावाह्याभ्यर्च्य बीजानि गोक्षीरेण मूलमन्त्रेण प्रक्षाळ्य, पूर्वोक्तबीजानां तिलादीनां नामधेयैर्नमोन्तैरर्चयेत् । तिलाय नमः ।

इदमासनमिदं पाद्यमित्यादिना सर्वाणि बीजानि पृथक्पृथगभ्यर्च्य बीजपात्रं वाससा परिवेष्ट्य कुण्डे स्थण्डिले वाऽग्निं प्रतिष्ठाप्य अग्नि-संतर्पणान्तं कृत्वा तन्मध्ये योगपीठं परिकल्प्य देवमावाह्य सकलीकृत्य नित्याभिस्समिद्भिः काम्यैर्द्रव्यैश्च यथाविधि हुत्वा पालिकाद्यधि-देवतानां मन्त्रैस्सोमादिमन्त्रैश्च पृथक्पृथगाज्येनाष्टौ चतुस्सकृद्वा हुत्वा, लोहजे मृण्मये वा पात्रे संपाताज्यं तस्यारूपे अपर्याप्तौ संस्कृतमन्य-द्वाज्यं तेन सह संमिश्र्यादाय पालिकाधिष्ठानं गत्वा उभाभ्यां हस्ताभ्यां पृथक्पृथक् दूर्वामादायाग्राणि घृते निमज्य पालिकाघटिका-शरावेषु आग्नेयादीशानान्तं व्यत्यस्तहस्ताभ्यां घृतं सेचयेत् । एकस्मिन् स्कन्धे विनियुक्तां दूर्वां परित्यज्यान्यस्मिन् स्कन्धे दूर्वान्तरेण घृतसेचनं कुर्यात् । एवं घृतारोपं कृत्वानन्तरमब्जनाभादीन् स्कन्धाधिदेवान् पुनस्समभ्यर्च्य मूलमन्त्रेण सर्वाण्यपि बीजान्यभिमन्त्रयेत् । अथ शुभे मुहूर्ते देशिकेन्द्रः प्राङ्मुखोदङ्मुखो वा तिष्ठन् आचार्यादीननुज्ञाप्य पालिकादिस्कन्धेषु मूलमन्त्रेण जितन्तामन्त्रेण वा उभयेन वा प्रति-स्कन्धमाग्नेयादीशानपर्यन्तं यथाक्रमं शङ्खादिवाद्यघोषसहितं पूर्वोक्त-तिलादिद्वादशबीजानि प्रत्येकं वापयेत् । अथवा सर्वाणि बीजानि एकस्मिन् पात्रे संमिश्र्य तेनैव वापयेत् । सर्वेषां बीजानामभावे मुद्गमेकमेव वापयेत् । एवं बीजावापमाचार्यानुमता अन्ये वा देशिकाः कुर्युः । अनन्तरं बीजोपरि सर्वत्र मृद्भिराच्छाद्य हरिद्रामिश्रितैः कुसुमवासितैर्जलैराग्नेयादिक्रमेण पूर्वसिक्तजलशोषणान्तं विरम्य विरम्य मन्दं पालिकादिबीजानि संसिच्य प्रत्येकं स्कन्धत्रयाणामुपरि चन्द्र-मण्डलमध्यगं तत्कान्तिसन्निभं देवं नारायणं स्वदेहोत्थैर्निरन्तरैः अमृतौघैः पात्रेषूप्तानि बीजानि सर्वतस्सिञ्चन्तं ध्यात्वा पात्राण्यर्च-यित्वा अहतैर्वस्त्रैः प्रतिस्कन्धमाच्छाद्य जगत्कारणं वामदेवं सर्वेषां पालिकादीनामुपरि आग्नेयादिक्रमेण संपूज्य तदष्टदिक्षु कुमुदादीनां पूर्वादिक्रमेण हरिद्राचूर्णपललालाजदधिसक्तुमिश्रितं चरुं भूतक्रूरसंज्ञं

बलिं दद्यात् । ततो यजमानः आचार्यादीन् यथोक्तदक्षिणाभिः फल-तांबूलादिभिश्च तोषयेत् । तदन्वाचार्यः पालिकादीन् क्रमेणोद्धृत्य सुगुप्ते स्थले संस्थाप्य तत्रापि पालिकादीनां परितोऽष्टदिक्षु कुमुदादीनां पूर्वोक्तभूतक्रूरबलिं प्रतिदिनं दद्यात् । तदाप्रभृति बहूननिर्वाणदीपान् परितः प्रदीप्य, अस्मिन्नङ्कुरार्पणकर्मणि न्यूनातिरिक्तप्रायश्चित्तार्थं मूल-मन्त्रेणाज्येन अष्टोत्तरशताहुतीर्हुत्वा पूर्णाहुत्यादिकं कृत्वा कुण्डगतं देवं हृदि विसृज्य चतुर्द्वाराधिदेवानां मन्त्रैश्च यथाविधि हुत्वाऽग्निं विसृजेत् ।

तदाप्रभृति प्रतिदिनं पालिकादीनां परितस्सायंप्रातरेककालं वा कुमुदादिबलिं दद्यात् । प्रतिदिनमाचार्यशिष्यो वा पालिकास्थानं गत्वा यथाविध्यभ्यर्च्याङ्कुराभिवृद्ध्यर्थं हरिद्रोदकैस्संसिच्य अवभृतान्तं संरक्षेत् । एवमङ्कुरार्पणं कृत्वा, गर्भगेहान्तःप्रविश्य देवमर्घ्यादिभिः नैवेद्यान्तमभ्यर्च्य अनिर्वाणदीपानारोप्य रात्रिशेषं समापयेत् ।

तदन्येद्युराचार्यो यथा वित्तानुसारेण क्रीत मभिनवं दुकूलपट्टं देवाङ्गं चित्रक्षौमं कार्पासिकं वा नीलरोमादिवर्जितं सुलक्षणदृढं नवभिस्सप्तभिः पञ्चभिर्वा हस्तैरायतं मूलबेरसमायामं द्वारायामं वा आयामार्धेन विस्तीर्णं पादेन कृतशेखरं शेखरेण समपुच्छं तदर्धकण्ठ-पुच्छान्वितं बालाख्यपटयोजितं निर्णेजितं खळीयुक्तं शोषितमेवंलक्षणा-न्वितं ध्वजपटमाहृत्य पटमध्ये कुशलेन शिल्पिना सलक्षणं गरुडं लेखयेत् । लेखनप्रकारस्तु—

छत्रं तु शिखरे कुर्यात्पार्श्वयोश्श्वेतचामरे । अधोनेकदळं पद्मं तदधः पूर्णकुम्भकम् ॥ कुम्भस्य पार्श्वे विलिखेत्साङ्कुरं पालिकागणम् । दीपानुशोभनौ कुर्यात्पालिकानां तु पार्श्वयोः ॥ ध्वजं तु गरुडाकारमेक-मूर्तेस्तु सत्तमाः । सत्यस्सुपर्णो गरुडस्तार्क्ष्यश्च चतुरात्मनः ॥ पञ्च-मूर्तेस्तु चत्वारो विहगेश्वरसंयुताः । सुपर्णताळमकरऋश्या वा

चतुरात्मनः ॥ तत ऊर्ध्वं तु सर्वेषां व्यूहानां गरुडो ध्वजः । पटमध्ये तु गरुडं द्विभुजं विधृतांजलिम् ॥ पुष्पाञ्जलिपुटं वाथ सुवर्णाचलसन्निभम् । गगने गमनारंभपक्षविक्षेपणान्वितम् ॥ कुञ्चितो वामपादस्तु दक्षिणः पृष्ठतः स्थितः । किञ्चिदायतवृत्ताक्षं नीलदीर्घाग्रनासिकम् ॥ अतीव शान्तवेषं तु तथा प्रहसिताननम् । बालचन्द्रसमाकारदंष्ट्राद्वयविराजितम् ॥ कुटिलभ्रुकुटीभङ्गं भङ्गुरालकशोभितम् । कम्बुग्रीवं बृहद्बाहुं पीनांसं दृढवक्षसम् ॥ पृथूदरं निम्ननाभिं रोमराजिविराजितम् । सुवृत्तकनकस्तम्भपीवरोरुद्वयान्वितम् । हेमरंभासमाकारजङ्घाक्रान्तपदद्वयम् । करण्डमकुटाक्रान्तपुष्पापीडविराजितम् ॥ वृत्ते वैपुल्यमानेन लोचने पद्मपत्रवत् । भ्रूयुग्मं नारसिंहोत्थं घ्राणाग्रं शुकतुण्डवत् ॥ सिंहवन्मध्यदेशस्तु तद्वशं गजपृष्ठवत् । तदेवं दैवदीर्घेण विस्तृतं हंसपक्षवत् ॥ स्वपक्षमाना द्विगुणं तत्पुच्छं शतशाखिनम् । सर्वेषामेव सामान्यं विशेषाख्यमथोच्यते ॥ मकुटादिसपादान्तं नानारत्नेन शोभितम् । हारकेयूरकटकब्रह्मसूत्रविभूषितम् ॥ प्रलंबकर्णपाशान्तविश्रान्तशुभकुण्डलम् । ललाटतिलकोपेतं पुष्पकर्णावतंसकम् ॥ रत्नाङ्गुलीयकोपेतं शिञ्जिनीरञ्जितांघ्रिकम् । अन्यैराभरणैर्दिव्यैर्भूषितं सर्पभूषितम् ॥ नीलाम्बरधरं नीलवारवाणविराजितम् । फुल्लरक्तोत्पलदळस्रग्भिर्मण्डितकन्धरम् ॥ तथा विचित्रकुसुमैस्स्रग्भिरन्याभिरुज्ज्वलम् । अनन्तो वामकटको यज्ञसूत्रं तु वासुकिः ॥ तक्षकः कटिसूत्रं तु हारः कार्कोटकस्तथा । पद्मो दक्षिणकण्ठे तु महापद्मस्तु वामतः ॥ शङ्खशिरःप्रदेशे तु गुळिकश्च भुजान्तरे । एतैरष्टोरगैराद्यैर्भूषितं भुजगोत्तमैः ॥ अनन्तश्शुक्लवर्णाभो रक्तवर्णस्तु वासुकिः । तक्षकः पीतवर्णाभो धूम्रः कार्कोटकस्तथा ॥ शङ्खस्तुहिनवर्णाभो गुळिकस्त्वळिसन्निभः । पद्मः पद्मसमानाभो महापद्मस्तु पिङ्गलः ॥ पञ्चवर्णैः लिखेदेवं देवं पञ्चायुधं तथा । चक्रं खड्गं शरं चैव शङ्खं शार्ङ्गं गदां तथा ॥ पटोर्ध्वे ह्युभये पार्श्वे विलिखेच्च यथाविधि । तदधो

दक्षिणे पार्श्वे वह्निमण्डलमालिखेत् ॥ तद्वल्लिखेद्वामभागे स्वस्तिकं लक्षणान्वितम् । लेपयेत्पटशेषं तु श्यामलेनासितेन वा ॥ विचित्रपुष्पसंयुक्तपत्रवल्लीसमन्वितम् ॥ एवमुक्तप्रकारेण शिल्पी पटमध्ये सलक्षणं सपरिकरं गरुडं लिखेत् ।

ततस्सायंकाले आचार्यो मूर्तिपैशिशल्पिशालां प्रविश्य पटस्थं गरुडमालोक्य तल्लक्षणानि परीक्ष्य शिल्पिनमीप्सितैर्धनैस्तोषयित्वा तत्पटमादाय यानादौ परिचारकमूर्ध्नि वा सौवर्णादिपात्रे विन्यस्य शङ्खादिवाद्यरवैस्सह ग्रामप्रादक्षिण्येन मुखमण्टपं नीत्वा, आचार्यः प्रासादान्तःप्रविश्य, मूलबिम्बस्य पादयोः प्रणम्याघ्यर्यादिभिरभ्यर्च्य मुखमण्टपमासाद्य शिल्पिनं विसृज्य, पटमर्घ्यांभसा प्रोक्ष्यास्त्राभिमन्त्रितैः सिद्धार्थैः पुष्पैश्च पटं संताड्य पटस्थस्य गरुडस्य दहनाप्यायने कृत्वा पटं भगवदभिमुखं दर्शयित्वा पुनरप्यर्घ्याद्यैर्मूलबिम्बमभ्यर्च्याञ्जलिं बध्वा भगवन् पुण्डरीकाक्ष सर्वेश्वर जगन्मय । त्वया यथा तु कथितं तथा कर्तुं न शक्यते ॥ अस्वातन्त्र्यादसामर्थ्याच्छ्रद्धादीनामभावतः । तस्मान्मानादिसर्वेषां न्यूनाधिक्योपशान्तये ॥ समालोकय नेत्राभ्यां शीतळाभ्यां पटस्थितम् । सर्वदोषापहारिभ्यां वैनतेयं प्रसीद ओम् ॥ इति विज्ञाप्य, पटं दीक्षितेन परिचारकेन वाहयित्वा प्रथमावरणे वातेन सार्धं चतुःप्रदक्षिणीकृत्य प्रासादाग्रस्थयागमण्टपं प्रविश्य तत्र शालितण्डुलैर्भद्रपीठं परिकल्प्य तत्पृष्ठे भद्राख्यमण्डलं विलिख्य विभवे सति तदुपरि वस्त्रमास्तीर्य तत्र तिलराशिं समुत्कीर्य तत्र स्वस्तिकमालिख्य तदुपरि पटं प्रासादाभिमुखं संस्थाप्य गरुडस्य दक्षिणभागे स्वासने समुपविश्य करशुद्धिपूर्वकं भूतशुद्ध्यन्तं कृत्वा पूर्वोक्तप्रकारेण स्वदेहे गरुडमन्त्रादीन्विन्यस्य तादात्म्यमवलम्ब्य मानसयागं कृत्वाऽर्घ्यादीनुपकल्प्य स्वदेहविन्यस्तमन्त्रानभ्यर्च्य द्वारस्थतोरणध्वजकुंभादींश्च पूर्ववदभ्यर्च्य ततः पुण्याहं वाचयित्वा तज्जलेन पटादीन् संप्रोक्ष्य

गरुडस्याग्रतो धान्यपीठे सकरकं सोपकुम्भाष्टकं महाकुंभं विन्यस्य जलद्रोण्यादिकं पात्रं गन्धतोयैस्संपूर्य करकस्य दक्षिणे निवेश्य, छायाधिवाससिद्ध्यर्थं पटस्य पुच्छे यथाविधि रक्षासूत्रं बध्वा जलद्रोण्यादिके वक्ष्यमाणप्रकारेण गरुडस्य सद्यश्छायाधिवासं कृत्वा, जलद्रोण्यादावधिवासितं कूर्चमुद्धृत्य तत्र स्थितं गरुडं पटे विचिन्त्य, गरुडस्य छायास्नपनं करिष्य इति सङ्कल्प्य वक्ष्यमाणाधमाधममार्गेण पटस्याग्रतो वेदिकोपरि संस्थिते सकूर्चे दर्पणे समावाहितं गरुडमभिषिच्य ततश्शोभने मुहूर्ते वक्ष्यमाणप्रकारेण नेत्रोन्मीलनं कृत्वा कुम्भसमीपमासाद्य कुम्भमध्ये आसनं परिकल्प्य तस्मिन् गरुडं करके सुदर्शनं उपकुंभाष्टके इन्द्रादींश्चाभ्यर्च्य, भित्तिसंसेचनं कृत्वा, पुनस्तत्रैव विन्यस्य ततो ध्वजपटे प्राग्वदासनं परिकल्प्य सहस्रादित्यभास्वरं गरुडमन्त्रं हृदयाद्विरेच्य पटस्थगरुडे विन्यस्य सकळीकृत्य संनिधिसंनिरोधसां मुख्यानि कृत्वा मुद्राः प्रदर्श्य लयभोगौ कृत्वा कुंभे करके पटे च महता विभवेन अलङ्कारासनान्तं क्रमेणाभ्यर्च्य, प्रासादान्तः मूलबिम्बं यात्राबिम्बं च अर्घ्यादिभिरभ्यर्चयित्वा हविर्निवेदनान्तं कारयित्वा ततःपरं कुंभे पटे च मधुपर्कफलमूलविविधान्नादिभिर्गरुडमभ्यर्च्य संप्रदानान्तं कृत्वा ततो गरुडस्य प्राग्भागे सलक्षणं कुण्डं स्थण्डिलं वा कारयित्वा तत्र यथाविध्यग्निं प्रतिष्ठाप्य अग्निमध्ये आसनं परिकल्प्य तत्र गरुडमावाह्य लयभोगान्तं कृत्वा गरुडमन्त्रेण यथाविधि समित्सप्तकं हुत्वा शान्त्यर्थं तिलैर्हुतैश्च प्रत्येकमष्टोत्तरशताहुतीर्हुत्वा पूर्णाहुतिं च कृत्वा देवतोद्वासनादिकमकृत्वैव कुण्डेऽग्निं संरक्षेत् ।

एवं ध्वजाधिवासं कृत्वा आचार्यो मूर्तिपैस्सह गर्भगेहं प्रविश्य रक्षाबन्धनं कुर्यात् । मूलमूलगतं देवमर्घ्यादिभिरभ्यर्च्य तत्पादौ हस्ताभ्यां प्रगृह्य, भगवन् पुण्डरीकाक्ष करिष्ये कौतुकक्रियाम् ।

महोत्सवार्थं देवेश तदर्थं त्वं प्रसीद मे ॥ इति विज्ञाप्य मूलादुत्सव-
बिम्बे देवमावाह्य अर्घ्यादिभिरभ्यर्च्य वस्त्रभूषणगन्धमाल्यैरलंकृत्य
सौवर्णं यानमारोप्य शङ्खभेर्यादिसहितं ग्रामधामप्रादक्षिण्येन देव-
मालयं नीत्वा आस्थानमंटपे वितानाद्यलंकृते सौवर्णपीठे देवमारोप्य
अर्घ्यादिभिरभ्यर्च्य महाहविर्निवेद्य ताम्बूलादिकं समर्प्य देवं प्रासा-
दान्तःप्रवेश्य ततस्सौवर्णं राजतं कांस्यं वा पात्रं भारमानैश्शालि-
तण्डुलैस्तदर्धैस्तत्पादैष्षडंशैरष्टांशैर्वाऽपूर्य तदूर्ध्वे हैमं क्षौमं कार्पासं
पट्टजं च सप्तभिः पञ्चभिश्चतुर्भिर्वा तन्तुभिः कृतं रक्षासूत्रं विन्यस्य
तत्रैव षष्ट्युत्तरशतक्रमुकतच्चतुर्गुणनागवल्लीदळतदर्धकदळ्यादिफलानि
च विन्यस्य तत्पात्रं गर्भाग्रमंटपे भारमानैस्तदर्धैर्वा शालिभिः परि-
कल्पिते पीठे विन्यस्य, तस्मिन्नेव पीठे अपूपसमन्वितं पात्रान्तरं च
विन्यस्य मूलमन्त्रेणार्घ्यादिभिरभ्यर्च्य वस्त्राभ्यामाच्छाद्य प्रतिसरपात्र-
मपूपपात्रं च दीक्षितयोः परिचारकयोश्शिरसि यानादौ वा विन्यस्य
सर्वेष्वप्यावरणेषु नृत्तगीतसहितं प्रदक्षिणं परिभ्राम्य एकस्मिन्वा
आवरणे चतुर्वारं द्विवारं वा प्रादक्षिण्येन परिभ्राम्य ग्रामादौ वा
एकवारं परिभ्राम्य, सुदर्शनविष्वक्सेनादिसहितं वा प्रदक्षिणीकृत्य
गर्भगेहं प्रविश्य देवस्य पुरतो धान्यपीठोपरि पात्रद्वयं विन्यस्य
पुण्याहं वाचयित्वा तज्जलेन रक्षासूत्रादिकं प्रोक्ष्य मूलमन्त्रेणार्घ्या-
दिभिरभ्यर्च्य मूलबिम्बादींश्च अर्घ्यादिभिरभ्यर्च्य हेमजं पट्टजं वा
रक्षासूत्रमादाय वामहस्तेन गृहीत्वा दक्षिणहस्तेन गन्धेनानुलिप्य
धूपेनाधिवास्य मूलबिम्बस्य दक्षिणहस्ते जितन्ताख्येन मन्त्रेण शङ्खा-
दिवाद्यसहितं रक्षासूत्रं बध्वा सूत्रं स्पृशन् अस्त्रमन्त्रं शतवारं जप्त्वा
तथैव उत्सवबिम्बस्य दक्षिणहस्ते हेममयं रक्षासूत्रं बध्वा तथैव श्रियो
वामहस्ते श्रीसूक्तेन श्रीमन्त्रेण वा पट्टजं रक्षासूत्रं बध्वा, भूम्याः
भूसूक्तेन भूमन्त्रेण वा क्षौममयं रक्षासूत्रं वामहस्ते बध्वा, स्नपन-
बिम्बादीनां दक्षिणहस्ते पट्टजं रक्षासूत्रं पूर्ववद्बध्वाऽऽचार्यस्स्वदक्षिणकरे

कार्पासं रक्षासूत्रं मूलमन्त्रेण बध्वा, तथैव ऋत्विक्परिचारकाणां च दक्षिणहस्ते रक्षासूत्रं बध्वा, सति विभवे सर्वेषां कांचनमयमेव रक्षासूत्रं बध्वा, देवमर्घ्यादिभिरभ्यर्च्य अपूपादीन्निवेद्य देवस्य दर्पणादीनि प्रदर्शयेत् । ततो यजमान आचार्यादीन् दीक्षितान् वैष्णवानन्यांश्च ताम्बूलैस्तोषयेत् । रक्षाबन्धोपयुक्तं तण्डुलादिकमाचार्यस्स्वयमादद्यात् । सर्वेष्वपि यागेषु एवमेव रक्षाबन्धनं कार्यम् ।

एवं रक्षाबन्धनं कृत्वा रात्रिशेषं समाप्य आचार्यो नित्यकर्मानुष्ठानं निर्वर्त्य देवस्य नित्यार्चनं कृत्वा विशेषेण चाभ्यर्च्य कुंभपूर्वकं वैनतेयं चाभ्यर्च्य महाहविर्निवेद्य गरुडमन्त्रेण होमं च कृत्वा ध्वजस्तंभस्थापनं कुर्यात् । प्रथमावरणे द्वितीयावरणादिके वा गोपुरस्यान्तर्बहिर्वा महाबलिपीठस्य पुरोभागे पश्चाद्भागे वा ध्वजस्तंभस्थापनं कुर्यात् । तदर्थमन्तस्सारं बहिस्सारं वा आर्द्रं नवं ऋजु स्निग्धं वक्रस्फोटनवर्जितं अयुग्मपर्वतं सत्वचं सुस्थिरं मानाङ्गुलवशेन मात्राङ्गुलवशेन वा शतताळमशीतिताळं षष्ठिताळं वाऽयतं प्रासादशिखराग्रोच्चं प्रासादोच्चं कण्ठोच्चं गोपुरोच्चं वा यथाशक्ति ध्वजस्तंभमानीय स्तम्भं चतुर्धा कृत्वा विभज्याग्रैकांशेन मस्तकं कृत्वा तदाधारभूतानि द्वितलेनायतानि तदर्धेन विस्तीर्णानि तदर्धेन घनानि त्रीणि पीठानि मूले स्थूलान्यग्रे सूक्ष्माणि मूलतश्छर्दितानि कृत्वा स्तम्भाग्रे तानि निवेश्य, अग्रे पीठद्वयच्छिद्रे ध्वजयष्टिं संयोज्य तदूर्ध्वे घण्टया सह दर्भमुष्टिं बध्वा एवंभूतं ध्वजस्तम्भं पीठस्योत्तरपार्श्वे निवेश्य शुद्धोदकैः प्रक्षाळ्य दर्भमालाभिस्संवेष्ट्यास्त्रवारिणा संप्रोक्ष्य पीठस्य पूर्वस्यां दिशि उत्तरे वा पूर्वाग्रमुत्तराग्रं वा शाययित्वा ध्वजपीठस्थिते गर्ते गरुडमन्त्रेणाभ्यर्च्य तत्र रत्नधान्यानि निक्षिप्य ब्राह्मणैर्वैष्णवशूद्रैर्वा देवदासैश्शङ्खभेर्यादिघोषसहितं ध्वजस्तम्भमुद्धृत्य तस्मिन् गर्ते गरुडमन्त्रेण ऋजुभूतं प्रासादाभिमुखं संस्थाप्य वालुकाभिरापूर्य दृढीकृत्य

स्तम्भमूलस्थले पञ्चहस्तोच्छ्रितां त्रिहस्तोच्छ्रितामेकहस्तोच्छ्रितां वा तावद्विस्तीर्णां चतुरश्रां वेदिकां कल्पयित्वा तदूर्ध्वेऽष्टदळं पद्मं कर्णिकास्थो यथास्तम्भस्तथा कृत्वाऽऽचार्यः प्रासादान्तःप्रविश्य मूलबिम्बमर्घ्यादिभिरभ्यर्च्य तस्मादुत्सवबिम्बे किञ्चिदावाह्य तं देवीभ्यां सह समभ्यर्च्य पादुके समर्प्य सौवर्णप्रभयाऽन्विते याने समारोप्य, बल्यर्चां च यानमारोप्य आचार्यो मूर्तिपैस्सह गरुडसन्निधिं गत्वा रथे कुंजरे याने वा ध्वजमारोप्य वस्त्रभूषणमाल्यपुष्पप्रभादिभिर्ध्वजमलंकृत्य वक्ष्यमाणयात्रोपकरणैस्सह पुरतो बलिबिम्बं मध्ये ध्वजपटं तदनु यात्रामूर्तिश्च क्रमेण प्रथमावरणमारभ्य रथ्यावरणान्तं ग्रामं च बलिदानपुरस्सरं प्रदक्षिणं भ्रामयित्वा यात्रामूर्तिमास्थानमण्टपे सिंहविष्टरे ध्वजस्तम्भसंमुखं संनिवेश्य बलिबिम्बं यथास्थानं नीत्वा ध्वजपटं शङ्खादिवाद्यरवैस्सह ध्वजस्तंभसमीपं नीत्वा स्तंभं शुद्धोदकैः प्रक्षाळ्य विभवे सति वस्त्रेण संवेष्ट्य त्रिवृत्कृतैरतिदृढैः कार्पाससूत्रैः कृतां रज्जुमादाय यष्ट्यग्रसंस्थिते यन्त्रे योजयित्वा तया रज्ज्वा ध्वजस्य शिखरं सुदृढं बध्वा सर्वैः परिजनैस्सह गरुडकुम्भपार्श्वमासाद्य तत्कुम्भं शिष्यमूर्ध्नि विन्यस्य उपकुम्भाष्टकं ब्राह्मणैर्वाहयन् वर्धनीं स्वकरेणादाय अभिन्नधारां कुम्भस्य पुरतस्सिञ्चन् वेदवाद्यघोषैस्सह देवागारं परिभ्राम्य स्तम्भमूलमासाद्य, तत्र धान्यपीठे महाकुम्भादिकं विन्यस्य पुण्याहं वाचयित्वा, अस्त्रमन्त्रेण ध्वजं संप्रोक्ष्य गरुडमन्त्रेण पटस्थं गरुडं पाद्याचमनगन्धमाल्यदीपधूपापूपपृथुकपानकतर्पणनाळिकेरोदकपुनराचमनकर्पूरतांबूलैरभ्यर्च्य गरुडमुद्रां प्रदर्श्य, ततः पुंसूक्तेन महाकुम्भस्थतोयेन गरुडं संप्रोक्ष्य कुम्भस्थं गरुडं पटस्थे नियोज्य उपकुंभाष्टकतोयेन यथाक्रममष्टनागान् संप्रोक्ष्य पटस्थस्य गरुडस्य मन्त्रन्यासादिकं कृत्वा पुष्पाञ्जलिपुरस्सरं संनिधिसंनिरोधसां मुख्यानि च कृत्वार्घ्यादिभिरभ्यर्च्य बहूपहारसहितमुद्गान्नादीन्निवेद्य ताम्बूलादीन् समर्प्य अञ्जलिं बध्वा गरुडस्तुतिं पठेत्।

वाहनाय महाविष्णोः तार्क्ष्यायामिततेजसे । गरुडाय नमस्तुभ्यं सर्वसर्पेन्द्रमृत्यवे ॥ नमो नमस्ते पक्षीन्द्र स्वाध्यायवपुषे नमः । विहगेन्द्र नमस्तेऽस्तु समुत्पाटितकल्पक ॥ आहृतामृतकुंभाय जननी-दास्यमोचिने । सुरासुरेन्द्रजयिने नागेन्द्राभरणाय ते ॥ यदाधारमिदं सर्वं तदाधाराय ते नमः । पक्षौ यस्य बृहत्साम रथन्तरमपि स्वयम् ॥ अक्षिणी चापि गायत्री त्रिवृत्साम शिरस्स्मृतम् । स्तोम आत्मा नमस्तस्मै वामदेव्यङ्गसंपदे ॥ नमः प्राणादिवायूनामीशानाय गरुत्मते । दोषानपनयाखण्डान् गुणानावह सर्वतः ॥ विघ्नानि जहि सर्वाणि आत्मसात्कुरु मामपि ॥ इति स्तुत्वा, बृहत्साम रथन्तरं च गरुडाय श्रावयित्वा, तत्काले गुरुर्गरुडं हृदि ध्यायन् निवेदितं मुद्गान्नादिकं कबळीकृत्य पौरुषैर्गारुडैर्मन्त्रैश्चाभिमन्त्र्य गरुडमच्युतं च ध्यायन् वन्ध्यानामपि योषितामञ्जलिषु दद्यात् । स्त्रियस्तान् पिण्डान् भक्त्या भुक्त्वा बहून् सुतान् जनयेयुः ।

ततो गरुडाग्रे आचार्यो दैवज्ञं ताम्बूलगन्धमाल्यैस्तोषयित्वा शुभप्रदं लग्नं लब्ध्वा शुभे मुहूर्ते आशीर्वादपुरस्सरं घण्टाशङ्खमृदङ्गा-दिरवैस्सह ध्वजपटं सुपर्णोऽसीति मन्त्रेण पूर्वोक्तरज्ज्वारोप्य रज्जुं स्तम्भे प्रादक्षिण्येन बध्वा ध्वजं प्रासादाभिमुखं स्तंभे संस्थापयेत् । एवं ध्वजारोहणं पूर्वाह्णे मध्याह्ने वा कुर्यात् ।

ततो यात्रामूर्तिं यानमारोप्य ध्वजस्तंभसमीपं नीत्वा ध्वजं दर्शयेत् । अशेषभक्तानामाह्वानार्थं गरुडं देवे आज्ञापयति सति देवं मण्टपे नीत्वाऽऽचार्यः पुष्पाञ्जलिर्भूत्वा ध्वजोदरे गरुडस्य संनिधिं प्रार्थयेत् । अस्माद्दिनात्समारभ्य यावत्तीर्थदिनान्तिमम् । संनिधिं कुरु पक्षीन्द्र राज्ञो जनपदस्य च ॥ ग्रामस्य यजमानस्य वैष्णवानां विशेषतः । तुष्ट्यै पुष्ट्यै चैव सर्वशत्रुजयाय च ॥ अपमृत्युजयार्थाय वैनतेय प्रसीद ओम् ॥ इति प्रार्थ्य, गरुडोपरि पुष्पाञ्जलिं विकीर्य,

देवस्य संनिधिं गत्वा, ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं मया । तत्सर्वं पूर्णमेवास्तु सुतृप्तो भव सर्वदा ॥ ओमच्युत जगन्नाथ मन्त्रमूर्ते जनार्दन । रक्ष मां पुण्डरीकाक्ष क्षमस्वाज प्रसीद ओम् ॥ इति विज्ञाप्य देवस्य पादयोः पुष्पाञ्जलिं समर्प्य, देवं मण्टपान्तरं नीत्वा अर्घ्यादिभिरभ्यर्च्य महाहविर्निवेद्य होमान्तं जपान्तं वा कृत्वा देवं प्रासादान्तः प्रवेश्य ध्वजपीठोर्ध्वे चतुस्तम्भाष्टस्तम्भां षोडशस्तंभां वा चतुस्तोरणान्वितां ध्वजदर्भमालां यवनिकान्वितां प्रपां कल्पयित्वा, तत्र समन्ततोऽनिर्वाणान् दीपानारोप्य तद्दिनमारभ्य पुष्पयागान्तं त्रिकालं गरुडं अर्चयन् बलिकाले बलिं दद्यात् ।

ततो निशामुखे प्रवृत्ते आचार्यो मूर्तिपैस्सह स्नानादिनित्यनियमान्निर्वर्त्य देवस्य संनिधिं गत्वा नित्यपूजां निर्वर्त्य श्रीपुष्टिभ्यां सह यात्राबिम्बमास्थानमण्टपं नीत्वा स्नानविष्टरे समारोप्य वक्ष्यमाणाधमोत्तमस्नपनेन देवं संस्नाप्य अलङ्कारासने अभ्यर्च्य महाहविर्निवेद्य जपान्तं कृत्वा भेरीताडनं कुर्यात् । देवस्य दक्षिणपार्श्वे आचार्यस्स्वासने समुपविश्य प्राणानायम्य नवाहोत्सवाङ्गं देवताह्वानं करिष्य इति सङ्कल्प्य देवस्याग्रतः चरणं पवित्रमिति महीं शुद्धोदकैः प्रक्षाळ्य, विष्णो रराटमिति दर्भैस्संमार्ज्य गन्धद्वारेति गोमयेनोपलिप्य आपः उन्दन्त्विति सुधाचूर्णैरलंकृत्य देवस्य त्वेत्यक्षतैर्विकीर्य ग्रीष्मो हेमन्तः इति धान्यपीठं परिकल्प्य शं नो देवीरिति पीठोपरि चतुर्दिक्षु कमलं विलिख्य त्रातारमिति मध्ये च पद्मं विलिख्य धन्वनागेति प्रागग्रैः उदगग्रैर्वा दर्भैरास्तीर्य मूर्धानमिति भुवं नमस्कृत्य आग्नेयादिषु दीपचतुष्टयं विन्यस्य पुण्याहं वाचयित्वा तज्जलैराप उन्दन्त्विति भेरीं संप्रोक्ष्य अग्निरायुष्मानिति सर्ववाद्यानि च संप्रोक्ष्य अर्यमायेति भेरीं धान्यपीठे स्थापयित्वा, तत्पूर्वे शङ्खं आग्नेये काहळं याम्ये मद्दळं नैर्ऋते वंशयुक्तां तन्त्रीं पश्चिमे मृदङ्गडुड्डुकहस्त्वमद्दळान् वायव्ये

कांस्यताळसमन्वितां झल्लरीं सौम्ये पटहह्रस्वपटहडुड्डुकान् ऐशान्ये झल्लरीहस्तघण्टाश्च विन्यस्य तेषां बाह्ये दक्षिणे गणिकाजनं तत्पार्श्वे मन्त्रगायकान् अग्रतो नर्तकान् उत्तरे वन्दिनश्च स्वस्वस्थाने अन्यान् वाद्यकोविदान् संस्थाप्य संभवानुगुणं वा संस्थाप्य ध्वजसमीपं गत्वा अर्घ्यादिहविरन्तैरुपचारैर्गरुडमभ्यर्च्य पुनर्भेरीपार्श्वमासाद्य भेरीं वाससा वेष्टयित्वा शब्दविग्रहमाकाशं भेर्यां संस्कृत्याभ्यर्च्य भेरीमध्ये विष्णुं तद्दक्षिणे ब्रह्माणं वामे रुद्रं च तत्तन्मन्त्रैरभ्यर्च्य भेरीदक्षिणे कोणे दण्डं संस्थाप्य तत्र वायुं संपूज्य शङ्खेषु विष्णुं काहळेषु सरस्वतीं मद्दळेष्विन्द्रं तन्त्र्यां गन्धर्वं मृदङ्गे रुद्रं डुड्डुकेषु षण्मुखं ह्रस्वमद्दलेषु मेदिनीं झल्लर्यां विष्णुं कांस्यताळे ब्रह्माणं पटहे श्रियं घण्टायां सरस्वतीं अन्येषु सर्ववाद्येषु विष्णुं चाभ्यर्च्य तत्काले वारस्त्रीभिः पुष्पाञ्जलीन् भेर्यूर्ध्वं विकिरयित्वा, ततस्स्नातं दर्भपाणिमलंकृतमुपवीतादिसंयुक्तं पञ्चसंस्कारशालिनं भगवद्भक्तिसंयुक्तं पारशवमन्त्रोदकेन संप्रोक्ष्य शोभने मुहूर्ते गुरुर्मूर्तित्रयं ध्यायन् तद्विष्णोरिति प्रथमं ब्रह्मजज्ञानमिति द्वितीयं कद्रुद्रायेति तृतीयं कोणेन भेरीं त्रिधा संताडयेत् । ततः पारशवस्तां भेरीं वहन् वामहस्तेन त्रिधा संताड्य दक्षिणहस्तेन त्रिधा संताडयेत् । ततः प्रथमं शङ्खनादं द्वितीयं काहळस्वनं तृतीयं ताडनं, एवं क्रमेण कारयेत् । देवताह्वानवेळायां सर्ववाद्यानपि घोषयेत् ।

ततो गुरुस्संस्कृतां प्राकृतां द्रामिडीं वा देवतावाहिनीं गाथां देवस्य श्रावयित्वा तत्काले तत्तद्देवताताळनृत्तादिकं देवाय दर्शयित्वा औत्सवं बिम्बं देवीभ्यां सह यानमारोप्य अलंकृत्य बलिबिम्बं च यानमारोप्य पुरतो बलिबिम्बं पश्चाद्यात्राबिम्बं च बलिदानपुरस्सरं सर्वेष्वावरणेषु भ्रामयित्वा ततो ग्रामं प्रवेश्य पूर्वस्यां दिशि प्राङ्मुखो गुरुः तत्पुत्रस्तच्छिष्यो वा उच्चतरेण स्वरेण देवतावाहनं कुर्यात् ।

आगच्छतामरगणाः प्रागाशां येऽधिशेरते । विरूपाश्च सुरूपाश्च सपर्यामुद्यतामिमाम् ॥ गृहीत्वा पान्तु नस्तृप्ताः कुमुदस्यानुयायिनः । महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः ॥ इति मन्त्रेण सगणं कुमुदमावाह्य ओं कुमुदाय नम इत्यर्घ्यं गन्धपुष्पधूपैरभ्यर्च्याहिंणं दत्वा पायसान्नबलिं तर्पणोदकं ताम्बूलं च दत्वा तदीयताळादीनि दर्शयित्वा, देवमाग्नेयां दिशं नीत्वा आचार्यः प्राङ्मुखस्सन्, आगच्छतासुरगणाः येऽग्न्याशामधिशेरते । भीमा भीममुखा रौद्राः सपर्यामुद्यतामिमाम् ॥ गृहीत्वा पान्तु नस्तृप्ताः कुमुदाक्षानुयायिनः । महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः ॥ इति सगणं कुमुदाक्षमावाह्य प्राग्वद्बलिं दत्वा तदीयताळादीनि दर्शयित्वा, देवं दक्षिणादिशं नीत्वा स्वयं प्राङ्मुखो भूत्वा, आगच्छतां पितृगणाः याम्याशां येऽधिशेरते । दारुणा दारुणाचारास्सपर्यामुद्यतामिमाम् ॥ गृहीत्वा पान्तु नस्तृप्ताः पुण्डरीकानुयायिनः । महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः ॥ इति सगणं पुण्डरीकमावाह्य प्राग्वद्बलिं दत्वा, तदीयताळादीनि दर्शयित्वा देवं नैर्ऋतदिशं नीत्वा स्वयमुदङ्मुखो भूत्वा, आगच्छतां यातुगणाः यात्वाशां येऽधिशेरते । क्रव्याशिनः क्रूरधियः सपर्यामुद्यतामिमाम् ॥ गृहीत्वा पान्तु नस्तृप्ताः वामनस्यानुयायिनः । महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः ॥ इति सगणं वामनमावाह्य प्राग्वद्बलिं दत्वा तदीयताळादीनि दर्शयित्वा देवं पश्चिमदिशं नीत्वा स्वयमुदङ्मुखो भूत्वा, आगच्छता हि प्रथमाः प्रतीचीं येऽधिशेरते । महद्विषा दन्दशूकाः सपर्यामुद्यतामिमाम् ॥ गृहीत्वा पान्तु नस्तृप्ताश्शङ्कुकर्णानुयायिनः । महन्त्विममुपायान्तु प्रीताः तेभ्यो नमोऽस्तु वः ॥ इति सगणं शङ्कुकर्णमावाह्य प्राग्वद्बलिं दत्वा तदीयताळादीनि दर्शयित्वा, देवं वायुदिशं नीत्वा स्वयं प्राङ्मुखो भूत्वा, आयान्तु गन्धर्वगणाः वाय्वाशां येऽधिशेरते । सुदर्शना भीमवेगास्सपर्यामुद्यतामिमाम् ॥ गृहीत्वा पान्तु नस्तृप्तास्सर्वनेत्रानु-

यायिनः । महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः ॥ इति सगणं सर्वनेत्रमावाह्य प्राग्वद्बलिं दत्वा तदीयताळादीनि दर्शयित्वा देवं सोमदिशं नीत्वा स्वयं प्राङ्मुखो भूत्वा, आगच्छतां गन्धर्वगणाः उदीचीं येऽधिशेरते । विरूपा दण्डहस्ताश्च सपर्यामुद्यतामिमाम् ॥ गृहीत्वा पान्तु नस्तृप्तास्सुमुखस्यानुयायिनः । महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः ॥ इति सगणं सुमुखमावाह्य प्राग्वद्बलिं दत्वा तदीयताळादीनि दर्शयित्वा, देवमीशानं दिशं नीत्वा स्वयं प्राङ्मुखो भूत्वा, आयान्तु पिशाचगणाः ईशाशां येऽधिशेरते । सशूलायुधहस्ताश्च सपर्यामुद्यतामिमाम् ॥ गृहीत्वा पान्तु नस्तृप्ताः सुप्रतिष्ठानुयायिनः । महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः ॥ इति सगणं सुप्रतिष्ठितमावाह्य प्राग्वद्बलिं दत्वा तदीयताळादीनि दर्शयित्वा देवं ग्राममध्यं नीत्वा स्वयं प्राङ्मुखो भूत्वा, आगच्छतां सिद्धगणाः गगनं येऽधिशेरते । शुचिमतयश्शुचयस्सपर्यामुद्यतामिमाम् ॥ गृहीत्वा पान्तु नस्तृप्ताः पृश्निगर्भानुयायिनः । महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः ॥ इत्यूर्ध्वे सगणं पृश्निगर्भमावाह्य प्राग्वद्बलिं दत्वा तदीयताळादीनि दर्शयित्वा तत्रैव, आगच्छताधरगणाः पृथिवीं येऽधिशेरते । बहुरूपा बहुज्ञानास्सपर्यामुद्यतामिमाम् ॥ गृहीत्वा पान्तु नस्तृप्ता मानवस्यानुयायिनः । महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः ॥ इति भूमौ मानवमावाह्य प्राग्वद्बलिं दत्वा तदीयताळादीनि दर्शयित्वा बलिशेषं सर्वं भूततृप्त्यर्थं महाबलिपीठे क्षिपेत् ।

एवं प्रथमावरणादिग्राममध्यपर्यन्तं तत्तद्दिशि तत्तद्बलिदानानन्तरं तत्तत्ताळरागादीनि कारयित्वा सर्वत्रान्तरालेषु गारुडं ताळं घोषयेत् । तत्काले अन्तरालेषु सर्वत्र आचार्योऽन्यो वा पूर्वोक्तसंस्कृतद्रामिडान्यतरभाषाविरचितैर्गाथाभिर्वैकुण्ठवासिनो ब्रह्मादिदेवा-

नन्यान् भगवद्भक्तान् भगवदुत्सवसेवार्थं भेर्यादिवाद्यघोषपूर्वकमाह्वयेत्। अनन्तरं देवमालयं प्रवेश्य गरुडस्थानमासाद्य ध्वजस्तम्भस्थितं गरुडमभ्यर्च्य तत्ताळादीनि दर्शयित्वा विष्वक्सेनं चाभ्यर्च्य तमपि तत्ताळादिभिस्तोषयेत् । अनन्तरं देवं प्रासादप्रादक्षिण्येन नीत्वा यागशालां प्रवेशयेत् ।

यागशालालक्षणं तु— वक्ष्यमाणप्रकारेण सर्वलक्षणसंयुताम् । प्रथमावरणे वापि द्वितीयावरणेऽपि वा ॥ तृतीयावरणादौ वा यथाभिमतदिग्गताम् । तदा प्रागाननां यद्वा यथाभिमतदिङ्मुखाम् ॥ एकद्वारां चतुर्द्वारां यद्वा द्वारद्वयान्वताम् । भित्तियुक्तामयुक्तां वा कोणभित्तिसमन्विताम् ॥ क्षिप्रकर्मप्रसिद्ध्यर्थं केवलं वा प्रपाकृतिम् । धूमनिर्गमनोपेतां मध्ये वेदिसमन्विताम् ॥ तदूर्ध्वे होमकुण्डं तु स चतुर्मेखलं भवेत् । मेखलात्रययुक्तं वा द्विमेखलमथापि वा ॥ तथैकमेखलं वापि चतुरश्रं सलक्षणम् । तत्पूर्वे मण्डलोपेतां वह्नौ दीपघटान्विताम् ॥ पश्चिमे बिम्बसंयुक्तामुत्तरे चाङ्कुरैर्युताम् । ईशान्ये कुम्भसंयुक्तां सर्वोपकरणैर्युताम् ॥ अलंकृतां वितानाद्यैस्तोरणध्वजशोभिताम् । एवंविधां यागशालामाचार्यः प्रविश्य प्राग्दिशि ऋग्वेदपाठकान् प्रत्यङ्मुखान् दक्षिणदिशि यजुर्वेदपाठकान् उदङ्मुखान् पश्चिमदिशि सामपाठकान् एकायनश्रुतिपाठकांश्च प्राङ्मुखान् उत्तरदिशि अथर्ववेदपाठकान् दक्षिणाभिमुखान् द्विद्विकसंख्यया समुपवेश्य, आचार्यः कलशस्थानमासाद्य तत्समीपे पूर्ववद्भातिभाविते स्वासने प्राङ्मुखमुपविश्य करशुद्ध्यादिमानसयागान्तं यथाविधि कृत्वाऽर्घ्यादीन्युपकल्प्य देहविन्यस्तमन्त्रान् प्राग्वदभ्यर्च्य पुण्याहं वाचयित्वा तज्जलेन सर्वसंभारान् संप्रोक्ष्य सौवर्णौ राजतौ ताम्रौ मृण्मयौ वा सूत्रवेष्टितौ गन्धोदकपूरितौ कूर्चपल्लवफलरत्नहिरण्यादिभिर्युक्तौ सपिधानौ द्वौ कलशौ प्रतिद्वारं पार्श्वयोः परिकल्पित-

धान्यपीठेषु विन्यस्य द्वितीयार्घ्यादिकमादाय पूर्वाद्युत्तरान्तमर्घ्यगन्धपुष्पधूपैर्द्वारदेवार्चनं कुर्यात् । तत्प्रकारः ।

पूर्वद्वारे अधस्तादुदुम्बरपार्श्वद्वये— ओं वास्त्वीशाय नमः । ओं क्षेत्रपालाय नमः । द्वारोर्ध्वे, ओं लक्ष्म्यै नमः । द्वारशाखयोः ओं वज्रनाभाय नमः । ओं हरीशाय नमः । द्वारकुम्भयोः, ओं संभवाय नमः, ओं प्रभवाय नमः । भ्रमणीदेशे, ओं कुमुदाय नमः, कुमुदाक्षाय नमः । द्वाराग्रभूमौ, ओं सुपर्णाय नमः । तोरणस्तम्भमूलयोः, ओं चण्डाय नमः ओं प्रचण्डाय नमः । तोरणोपरि, चक्रद्वितयमध्यस्थपक्षीशाय नमः । तत्पार्श्वध्वजयोः, ओं चक्रराजाय नमः । दक्षिणद्वारे पूर्ववद्वास्त्वीशक्षेत्रपालानभ्यर्च्य ऊर्ध्वे ओं कीर्त्यै नमः । द्वारशाखयोः, ओं धर्माध्यक्षाय नमः, ओं नियन्त्रे नमः । द्वारकुम्भयोः, ओं पूर्णाय नमः, पुष्कराय नमः । भ्रमणीदेशे ओं पुण्डरीकाय नमः, ओं वामनाय नमः । द्वाराग्रभूमौ ओं चक्राय नमः । तोरणस्तम्भमूलयोः, ओं धात्रे नमः, ओं विधात्रे नमः । तोरणोपरि चक्रद्वितयमध्यस्थपक्षीशाय नमः । तत्पार्श्वयोः, ओं चक्रराजाय नमः । पश्चिमद्वारे, ऊर्ध्वे ओं जयायै नमः । द्वारशाखयोः ओं सिद्धाध्यक्षाय नमः, ओं अमृताशनाय नमः । द्वारकुम्भयोः, ओं आनन्दाय नमः, ओं नन्दनाय नमः । भ्रमणीदेशे ओं शङ्कुकर्णाय नमः, ओं सर्वनेत्राय नमः । द्वाराग्रभूमौ, हेमदण्डगतसत्त्वाय नमः । तोरणस्तम्भमूलयोः, ओं जयाय नमः, विजयाय नमः । तोरणोपरि चक्रद्वितयमध्यस्थपक्षीशाय नमः । तत्पार्श्वयोः, ओं चक्रराजाय नमः । उत्तरद्वारे, ऊर्ध्वे ओं मायायै नमः । द्वारशाखयोः, ओं वसुनाथाय नमः, ओं धानन्दाय नमः । द्वारकुम्भयोः, ओं वीरसेनाय नमः, ओं सुषेणाय नमः । भ्रमणीदेशे, ओं सुमुखाय नमः, ओं सुप्रतिष्ठाय नमः । द्वाराग्रभूमौ ओं कौमोदक्यै नमः । तोरणस्तम्भमूलयोः ओं भद्राय

धान्यपीठेषु विन्यस्य द्वितीयार्घ्यादिकमादाय पूर्वाद्युत्तरान्तमर्घ्यगन्धपुष्पधूपैर्द्वारदेवार्चनं कुर्यात् । तत्प्रकारः ।

पूर्वद्वारे अधस्तादुदुम्बरपार्श्वद्वये— ओं वास्त्वीशाय नमः । ओं क्षेत्रपालाय नमः । द्वारोर्ध्वे, ओं लक्ष्म्यै नमः । द्वारशाखयोः ओं वज्रनाभाय नमः । ओं हरीशाय नमः । द्वारकुम्भयोः, ओं संभवाय नमः, ओं प्रभवाय नमः । भ्रमणीदेशे, ओं कुमुदाय नमः, कुमुदाक्षाय नमः । द्वाराग्रभूमौ, ओं सुपर्णाय नमः । तोरणस्तम्भमूलयोः, ओं चण्डाय नमः ओं प्रचण्डाय नमः । तोरणोपरि, चक्रद्वितयमध्यस्थपक्षीशाय नमः । तत्पार्श्वध्वजयोः, ओं चक्रराजाय नमः । दक्षिणद्वारे पूर्ववद्वास्त्वीशक्षेत्रपालानभ्यर्च्य ऊर्ध्वे ओं कीर्त्यै नमः । द्वारशाखयोः, ओं धर्माध्यक्षाय नमः, ओं नियन्त्रे नमः । द्वारकुम्भयोः, ओं पूर्णाय नमः, पुष्कराय नमः । भ्रमणीदेशे ओं पुण्डरीकाय नमः, ओं वामनाय नमः । द्वाराग्रभूमौ ओं चक्राय नमः । तोरणस्तम्भमूलयोः, ओं धात्रे नमः, ओं विधात्रे नमः । तोरणोपरि चक्रद्वितयमध्यस्थपक्षीशाय नमः । तत्पार्श्वयोः, ओं चक्रराजाय नमः । पश्चिमद्वारे, ऊर्ध्वे ओं जयायै नमः । द्वारशाखयोः ओं सिद्धाध्यक्षाय नमः, ओं अमृताशनाय नमः । द्वारकुम्भयोः, ओं आनन्दाय नमः, ओं नन्दनाय नमः । भ्रमणीदेशे ओं शङ्कुकर्णाय नमः, ओं सर्वनेत्राय नमः । द्वाराग्रभूमौ, हेमदण्डगतसत्त्वाय नमः । तोरणस्तम्भमूलयोः, ओं जयाय नमः, विजयाय नमः । तोरणोपरि चक्रद्वितयमध्यस्थपक्षीशाय नमः । तत्पार्श्वयोः, ओं चक्रराजाय नमः । उत्तरद्वारे, ऊर्ध्वे ओं मायायै नमः । द्वारशाखयोः, ओं वसुनाथाय नमः, ओं धानन्दाय नमः । द्वारकुम्भयोः, ओं वीरसेनाय नमः, ओं सुषेणाय नमः । भ्रमणीदेशे, ओं सुमुखाय नमः, ओं सुप्रतिष्ठाय नमः । द्वाराग्रभूमौ ओं कौमोदक्यै नमः । तोरणस्तम्भमूलयोः ओं भद्राय

नमः, ओं सुभद्राय नमः । तोरणोपरि चक्रद्वितयमध्यस्थपक्षीशाय नमः । तत्पार्श्वयोः, ओं चक्रराजाय नमः । मध्यवेद्यां प्रागादिध्वजचतुष्टये ओं सत्याय नमः । ओं सुपर्णाय नमः, ओं गरुडाय नमः, ओं ताक्ष्यार्य नमः । ईशानादाग्नेयान्तध्वजचतुष्टये, ओं ताक्ष्यार्य नमः, ओं गरुडाय नमः, ओं सुपर्णाय नमः । ओं सत्याय नमः । इत्येतान् अर्घ्यगन्धपुष्पधूपनैवेद्यैस्समभ्यर्च्य शालायाः बहिः परितः आवरणत्रयं मनसा सङ्कल्प्य, प्रथमावृतौ उपेन्द्रादिदशकं द्वितीयावृतौ इन्द्रादिदशकं तृतीयावृतौ तदस्त्रभूतवज्रादिदशकं च यजेत् । पूर्वदिग्भागे ओं उपेन्द्राय नमः, इन्द्राय नमः, ओं वज्राय नमः । आग्नेये ओं तेजोधराय नमः, ओं अग्नये नमः, ओं शक्त्यै नमः । दक्षिणे ओं दुरतिक्रमाय नमः, ओं यमाय नमः, ओं दण्डाय नमः । नैर्ऋत्यां ओं महाकर्मणे नमः, ओं निर्ऋतये नमः, ओं खड्गाय नमः । वारुण्यां ओं महाह्रदयाय नमः, ओं वरुणाय नमः, ओं पाशाय नमः । वायव्यां ओं अग्राह्याय नमः, ओं वायवे नमः, ओं ध्वजाय नमः । उत्तरे ओं वसुरेतसे नमः, ओं सोमाय नमः, ओं शिशिराय नमः । ईशान्यां ओं वर्धमानाय नमः, ओं ईशानाय नमः, ओं शूलाय नमः । आकाशे ओं साक्षिणे नमः, ओं प्रजापतये नमः, ओं मुसलाय नमः । भूमौ ओमाधारनिलयाय नमः, ओं नागेन्द्राय नमः, ओं लाङ्गलाय नमः, इत्येतानभ्यर्चयेत् ।

एवं द्वारपूजां कृत्वा पुनः कुंभस्थाने समुपविश्य दृढं शुभ्रमेकरूपं निर्व्रणं मृण्मयं कुंभं ताम्रं राजतं सौवर्णं वा रत्नहाटकस्रग्गन्धफलसर्वौषधिपल्लवकूर्चसंयुक्तं गालितोदकसंपूर्णं वारिधारान्वितं सूत्र-

तोरणोपरि चक्रद्वितयमध्यस्थपक्षीशाय नमः, ओं सुभद्राय नमः । मध्यवेद्यां प्रागादिध्वज-तत्पार्श्वयोः, ओं चक्रराजाय नमः । चतुष्टये ओं सत्याय नमः । ओं सुपर्णाय नमः, ओं गरुडाय नमः, ओं तार्क्ष्याय नमः । ईशानादाग्नेयान्तध्वजचतुष्टये, ओं तार्क्ष्याय नमः, ओं गरुडाय नमः, ओं सुपर्णाय नमः । ओं सत्याय नमः । इत्येतान् अर्घ्यगन्धपुष्पधूपनैवेद्यैस्समभ्यर्च्य शालायाः बहिः परितः आवरणत्रयं मनसा सङ्कल्प्य, प्रथमावृतौ उपेन्द्रादिदशकं द्वितीयावृतौ इन्द्रादि-दशकं तृतीयावृतौ तदस्त्रभूतवज्रादिदशकं च यजेत् । पूर्वदिग्भागे ओं उपेन्द्राय नमः, इन्द्राय नमः, ओं वज्राय नमः । आग्नेये ओं तेजोधराय नमः, ओं अग्नये नमः, ओं शक्त्यै नमः । दक्षिणे ओं दुरतिक्रमाय नमः, ओं यमाय नमः, ओं दण्डाय नमः । नैर्ऋत्यां ओं महाकर्मणे नमः, ओं निर्ऋतये नमः, ओं खड्गाय नमः । वारुण्यां ओं महाह्रदयाय नमः, ओं वरुणाय नमः, ओं पाशाय नमः। वायव्यां ओं अग्राह्याय नमः, ओं वायवे नमः, ओं ध्वजाय नमः । उत्तरे ओं वसुरेतसे नमः, ओं सोमाय नमः, ओं शिशिराय नमः । ईशान्यां ओं वर्धमानाय नमः, ओं ईशानाय नमः, ओं शूलाय नमः। आकाशे ओं साक्षिणे नमः, ओं प्रजापतये नमः, ओं मुसलाय नमः । भूमौ ओमाधारनिलयाय नमः, ओं नागेन्द्राय नमः, ओं लाङ्गलाय नमः, इत्येतानभ्यर्चयेत् ।

एवं द्वारपूजां कृत्वा पुनः कुंभस्थाने समुपविश्य दृढं शुभ्रमेक-रूपं निर्व्रणं मृण्मयं कुंभं ताम्रं राजतं सौवर्णं वा रत्नहाटकस्रग्गन्ध-फलसर्वौषधिपल्लवकूर्चसंयुक्तं गालितोदकसंपूर्णं वारिधारान्वितं सूत्र-वेष्टितं पट्टवस्त्रपुष्पमालयालंकृतं चन्दनाद्युपलिप्तं परितश्चाक्षतार्चितं सपिधानं महाकुंभमादाय चतुर्भारैस्त्रिभारैर्द्विभाराभ्यामेकभारेण वा शालिभिस्तदुपरि तावन्मानैस्तदर्धैर्वा तण्डुलैस्तदुपरि तत्पादैस्तत्समैः

वा तिलैरन्तरान्तराहतवस्त्रसंयुतं परिकल्पिते धान्यपीठे विन्यस्य तत्कुंभममलवर्चसं देवताशरीरं ध्यात्वा सास्त्रेण चक्रमन्त्रेणाभिमन्त्र्य पूर्वोक्तद्रव्यसंयुक्तं करकं चादाय मन्त्रनाथस्य दक्षिणे कलशोत्तरे विन्यस्य महाकुंभस्य परितः पूर्वोक्तद्रव्यैरलंकृतमुपकलशाष्टकं प्रागादिक्रमेण विन्यस्य महाकुंभस्य मध्ये पूर्ववदनन्तादियोगपीठं परिकल्प्य गणनाथादींश्चाभ्यर्च्य पीठमध्ये पुण्डरीकाक्षं श्रीमन्नारायणमावाह्य कुम्भमण्डलवह्निस्थं पश्चिमाभिमुखं यजेदिति वचनात्पश्चिमाभिमुखं ध्यायेत् । सृष्टिन्यासादिभिस्सकलीकृत्य संनिधिसंनिरोधसां मुख्यानि च यथाविधि कृत्वा लयभोगाभ्यां चाभ्यर्च्य तस्य दक्षिणदिग्गते करके चैवमेवास्त्रविग्रहरूपं सुदर्शनं चावाह्याभ्यर्च्य परितो न्यस्तोपकुम्भेष्वपि देवप्राच्या प्रागादिषु वासुदेवादीन् ईशानादिषु अनिरुद्धादींश्च प्रभवाव्ययक्रमेण संपूज्याञ्जलिं बध्वा, यागालयं हि विश्वेश गृहाण रचितं मया । आसमाप्तिं भज विभो क्रियाङ्गानां च सन्निधिम् ॥ इति प्रार्थ्य ततो महाकुम्भं शिष्यादिना वाहयन् स्वयमस्त्रोदकधारां तत्पुरतः अच्छिन्नां भित्तिगां सिञ्चन् ईशानादिपुनस्तत्पदान्तं यागगेहान्तः प्रदक्षिणीकृत्य पुनर्धान्यपीठोर्ध्वे वर्धनीकं महाकुम्भं विन्यस्य पुनरर्घ्यपुष्पादिभिरापूर्याहतं वस्त्रयुग्ममस्त्रमन्त्रेणाभिमन्त्र्य धूपाधिवासितं कृत्वा महाकुम्भं वर्धनीं च वस्त्राभ्यां संवेष्ट्य, महाकुम्भे भगवन्तं नारायणं करके सुदर्शनं दिक्कलशेषु वासुदेवादींश्च मन्त्रासनादिभोज्यासनान्तमभ्यर्च्य तत्र रक्षार्थमस्त्रमन्त्रेणास्त्रं विभाव्य ततो मण्डलवेदिमासाद्य गोमयाम्भसोपलिप्ते वेद्यूर्ध्वभागे सूत्रपातपूर्वकं वक्ष्यमाणविधिना मण्डलमालिख्य अर्घ्यतोयेन प्रोक्ष्य, रजांसि विद्धि भूतानि सितपीतादिकानि च । तन्मात्राण्युपशोभानि शोभानि करणानि तु ॥ एवं सर्वाणि कोणानि सद्वाराणीन्द्रियाणि च । बहिरावरणं यद्वै सत्त्वाद्यं त्रितयं हि यत् ॥ मनस्सुविततता वीथी गर्वः पीठमुदाहृतम् । धीमपद्मं तदधिष्ठाता बीजात्मा चिन्मयः पुमान् ॥ अमूर्तमीश्वरश्चात्र

तिष्ठत्यानन्दलक्षणः । यस्य संदर्शनादेव शश्वच्चात्मा प्रसीदति ॥
सलक्षानामसलक्षानां वपुष्पाते कृते सति । प्रायशो मूर्तिभाजां च इह
जन्मैकशेषेषेणाम् ॥ देव आस्तेऽश्नतां हित्वा बहिरन्तश्च कर्मिणाम् ।
अन्यथा दृष्टमात्राद्धै कथमाह्लादमेति वै ॥ अन्तस्संवेदनसममास्तित्व-
प्रतिपादकम् । यद्यत्खलु क्षणं तत्त्वं तत्तत्सर्वत्र सिद्धिदम् ॥ वस्तुत्वेन
गृहीत्वैवं मण्डलं पूर्वनिर्मितम् ॥ इत्युक्तप्रकारेण मण्डले सद्भावं
ज्ञात्वा तद्द्वारेषु चण्डाद्यर्चनपूर्वकं मध्ये अनन्तादियोगपीठं परिकल्प्य
गणनादादींश्च अभ्यर्च्य, तदनुज्ञया कर्णिकायां भगवन्तमावाह्य,
मन्त्रन्यासादिना सकलीकृत्य लयभोगोक्तविधिनाभ्यर्च्य मन्त्रासनादि-
जपयज्ञान्तं देवमभ्यर्च्य, ततः कुण्डसमीपं गत्वा यथाविधि कुण्डं
तत्रानलं च संस्कृत्य, तत्र यथोक्तविधिना भगवन्तमावाह्य समित्सप्तक-
होमान्तं कृत्वा काम्यद्रव्यैश्च हुत्वा स्विष्टकृत्प्रायश्चित्ताहुतीः पूर्णाहुतीश्च
हुत्वा, तत्र स्थितदेवस्य तीर्थावसानकीं स्थितिं प्रार्थ्य, नोत्सृजेत्
परिधीन् दर्भान् देवाश्चोद्वासयेत्ततः । प्रत्यहं धारयेदग्निं यावत्तीर्थ-
दिनान्तिमम् ॥ अहोरात्रं प्रतिदिनं जुहुयादुक्तवर्त्मना ॥ इत्युक्तप्रकारेण
प्रत्यहमग्निं धारयेत् ।

ततो बिम्बसंनिधिं गत्वा होमं समर्प्य पुनर्देवमर्घ्यादिभिः
अभ्यर्च्य चतुर्दिक्षु द्वारबलिं दत्वा ततो यागगेहात् देवमन्तःप्रवेश्य
तत्र देवं पुनरभ्यर्च्य रात्रिशेषं समापयेत् । अङ्कुरार्पणदिनमारभ्य
पुष्पयागदिनान्तं आचार्यः स्नानार्चनभगवत्पादोदककुशोदकपान श्रीम-
दष्टाक्षरजपनैवेद्यप्राशन नक्ताशन केशवादिद्वादशनामसङ्कीर्तनात्मकं
व्रतं द्वादशदिनं कुर्यात् ।

ततो द्वितीयदिवसे प्रभाते आचार्यः स्नानादिनित्यनियमात्
निर्वृत्य देवस्य नित्यार्चनं कृत्वा, यागगेहं प्रविश्य कुंभसमीपे समुपविश्य

वेदघोषे वाद्यघोषे च प्रवर्तिते, पूर्वोक्तविधिना कुम्भदेवमभ्यर्च्य, मण्डलसमीपं गत्वा तत्रापि यथाविध्यर्चनं कुर्यात्। पूर्वेद्युर्यस्मिन्कुम्भे यस्मिन्मण्डले चार्चनं कृतं तदन्येद्युरपि तस्मिन्कुण्डे तस्मिन्मण्डल एव पर्युषितदोषाभावात् पूजनं कुर्यात् । पुरातने मण्डले भस्मनिभे सति तत्र पूजनमकृत्वा, तद्गतदेवं कुम्भस्थे संयोज्य, पुनर्मण्डलं यथाविधि पावमानैः पञ्चवर्णैस्समापाद्य कुम्भस्थदेवं पुनस्तत्र समावाह्य यथाविध्यभ्यर्चयेत् । एवं कुम्भे दोषस्संभवेऽपि तत्र स्थितं देवं मण्डले संयोज्य कुम्भं संक्षाळ्य पुनर्विमलोदकैरापूर्य पूर्ववदलंकृत्य, मण्डलस्थदेवं पुनस्तत्र समावाह्य यथाविध्यभ्यर्चयेत् । एवं कुम्भे मण्डले च देवमभ्यर्च्य अथाचार्यो देवगेहं प्रविश्य दण्डवत्प्रणम्य अर्घ्यादिभिरभ्यर्च्य पूजान्तरनिवेदितं पुष्पमाल्यादिकमपनीय विष्वक्सेनस्य समर्प्य अस्त्रमन्त्राभिमन्त्रितैश्शुद्धवारिभिः पीठं भगवद्बिम्बं निर्मलीकृत्य प्रासादं शोधयित्वा सर्वसंभारान् प्रकल्प्य मन्त्रासनपूर्वकं भोज्यासनान्तं सविशेषं देवमभ्यर्च्य, ततो यागगृहं गत्वा तत्र वह्नौ विभुं संतर्पयेत् । क्षीराज्यतण्डुलैर्युक्तं हृन्मन्त्रेण चरुं संश्राप्य समुद्धृत्यार्धपूतं चरुं चतुर्धा विभज्य कुम्भमण्डलबिम्बानां त्रीनंशान् निवेद्य एकांशमग्नौ जुहुयात् । यद्वा, पूर्वमेव संसाधितं चरुं कुम्भादीनां क्रमेण निवेद्य सर्वं द्विजप्रदानान्तं कृत्वा पश्चादग्नौ देवं संतर्पयेत् । एवं पूर्णाहुत्यन्तं कृत्वा पश्चाच्चतुर्द्वारेषु बलिं च दत्वा गर्भगेहान्तः प्रविश्य भगवतो होमं समर्प्य बलिबिम्बं यानमारोप्य वस्त्रादिभिरलंकृत्य ब्राह्मणैर्वाहयन् चण्डादिद्वारावरणदेवानां कुमुदादिग्रामदेवतानां च बलिं दत्वा बलिबिम्बं प्रासादान्तः प्रवेशयेत् । एवं तीर्थदिनान्तं प्रतिदिनं कालद्वयेऽपि बलिदानं कुर्यात् । आरम्भदिवसे रात्रौ समाप्तिदिवसेऽहनि । एककालमेव बलिं दद्यात् । एवं दिवारात्रौ च नित्यपूजानन्तरं चतुस्स्थानार्चनपूर्वकं बलिदानान्तं कृत्वा रात्रौ दिवसे वा यथारुचि बल्यन्ते वाहनारोहणं कुर्यात् ।

तत्प्रकारस्तु, यात्राबिम्बगतं देवं देवीभ्यां सह वा विना वा विचित्रवस्त्रभूषणमाल्यैरलंकृत्य हेमादिनिर्मितमलंकृतं वक्ष्यमाणप्रकारेण तत्तद्दिनोक्तवाहनं समानीय संप्रोक्ष्य गरुडरूपिणं ध्यात्वा तन्मन्त्रेण अर्घ्यादिभिरभ्यर्च्य सवेदवाद्यघोषं देवं यानप्रादक्षिण्येन नीत्वा, यानोपरि निवेश्य दृढीकृत्य आभरणैर्विशेषेणालंकृत्य अर्घ्यादिभिः अभ्यर्च्य तांबूलादीन् निवेद्य विहगेश्वरं ध्यायद्भिर्ब्राह्मणैर्भक्तिसंयुतैः वैष्णवैश्शूद्रैर्वा यानं वाहयेत् ।

ब्राह्मणैर्ध्रीयमानैश्च कंचुकोष्णीषधारिभिः । मौक्तिकैरातपत्रैश्च मायूरैश्च सुशोभनैः ॥ हेमदण्डसमायुक्तैस्तालवृन्तैस्तथाविधैः । पट्टजैर्विविधैश्चापि चामरैश्च सितासितैः ॥ केतुदण्डैश्च विविधैर्वैजयन्तीविभूषितैः । केवलै रत्नदण्डैश्च तथान्यैर्मांगळीयकैः ॥ वन्दिबृन्दैश्च विविधैर्वीणावेणुस्वनैस्तथा । सुवर्णशृङ्गघोषैश्च तथान्यैर्मङ्गळस्वनैः ॥ गणिकादेवदासीभिस्तथा नागरिकैर्जनैः । विप्रैर्वेत्रलताहस्तैः कंचुकोष्णीषभूषितैः ॥ सुमृष्टधूपपात्राणि वहद्भिः पार्श्वतस्तथा । अनेकशतसङ्ख्याकैर्दीपैरतिसमुज्ज्वलैः ॥ पादुके रत्नखचिते पात्रे हेमादिनिर्मिते । विन्यस्य देवपुरतो वहद्भिः परिचारकैः ॥ ऋग्यजुस्सामवेदांस्तु पठद्भिः पृष्ठतस्स्थितैः । ब्राह्मणैर्दक्षिणे भागे तथा चैकायनीश्रुतीः ॥ संहिताः सात्वताद्याश्च पठद्भिर्भक्तिसंयुतैः । वासुदेवस्य माहात्म्यं कथयद्भिश्च सन्ततम् ॥ वासुदेवार्चनपरैः सात्त्विकैः पाञ्चरात्रिकैः । वामे तु सेतिहासानि पुराणानि स्तुतीरपि ॥ नानाभाषाविरचिताः विष्णुपारम्यसूचकाः । पठद्भिर्ब्राह्मणैर्भक्तैस्त्रय्यन्तार्थविचारिभिः ॥ शाब्दकैः तार्किकैश्चैव तथा मौहूर्तिकादिभिः । तत्तच्छास्त्रप्रमेयं तु ब्रुवाणैर्विनयान्वितैः ॥ गायद्भिरग्रे देवस्य द्राविडीश्रुतिमुत्तमाम् । तथा भाषाप्रबन्धांश्च गद्यपद्यात्मिकानपि ॥ कथाश्च वैष्णवीर्भक्त्या ब्रुवाणैः वैष्णवोत्तमैः । ब्राह्मणैः क्षत्रियैर्वैश्यैश्शूद्रैश्च भगवत्परैः ॥ भगवद्दर्शना-

सक्तचित्तैः प्रणतशालिभिः । सेवया सर्वतो दिक्षु चतुरङ्गबलाढ्यया ॥ राजोचितैः परिकरैरन्यैश्च विविधैस्सह ॥ इत्युक्तप्रकारेण सर्वपरिकरैः सह ग्रामवीथीषु देवं प्रादक्षिण्येन भ्रामयन् तत्र तत्र मुखवास-ताम्बूलकर्पूरादिभावितचन्दनविविधमाल्यसीतळतर्पणनारिकेळोदकानि श्रमशान्तिनिमित्तानन्यान्यपि देवाय समर्प्य ग्रामादिदिगष्टके तदन्त-राळेषु च विविधनृत्तगीतवाद्यैर्देवं संतोष्य, एवं सविभवमुत्सवं कृत्वा, देवं यानादवरोप्य बाह्यमण्टपे सौवर्णविष्टरे देवमारोप्य-अर्घ्यपाद्याचामगन्धमाल्यदीपधूपनीराजनार्हणोदकापूपपृथुकतर्पणनाळि-केरोदकपुनराचमनमुखवासताम्बूलैः क्रमेण देवमभ्यर्च्य पुनर्देवं यानान्तरे समारोप्य मंदिरान्तःप्रवेश्य महापीठस्य पुरतो देवं पुनरर्घ्यादिभिरभ्यर्च्य अपूपानुपहारांश्च निवेद्य ताम्बूलादीन् समर्प्य देवस्याग्रे ब्राह्मणैः ऋगादिचतुर्वेदान् वैष्णवसत्तमैर्द्रामिडीस्तुतिं च पाठयित्वा शङ्खमृदङ्गगीतनृत्तादिभिस्सह देवं मंदिरप्रदक्षिणं नीत्वा, सोपानमार्गेण मन्दं मन्दं देवमन्तः प्रवेशयेत् । तदानीं देवदेवाय ताम्बूलादीन् निवेदयेत् ।

चामरैस्तालवृन्ताद्यैर्वीजयेच्छ्रमशान्तये । स्तोत्रैस्स्तुवीत देवेशं संस्कृतैर्द्राविडैस्तु वा ॥ वीणावेणुमृदङ्गैश्च मङ्गलैस्तालनिस्स्वनैः । द्रामिडश्रुतिगीतानि कुर्वद्भिर्वैष्णवोत्तमैः ॥ तथा मङ्गळगानाभिर्गणि-काभिः पदेपदे । उच्चैरुद्घुष्यमाणैश्च वन्दिस्तोत्ररवैस्सह ॥ नाना-विधोपचारैश्च देवमन्तःप्रवेशयेत् ॥ इत्युक्तप्रकारेण नानाविधोपचार-पूर्वकं देवमन्तःप्रविश्य प्रासादद्वारे पुनर्देवमर्घ्यादिभिरभ्यर्च्य स्वस्थाने संनिवेशयेत् । एवं प्रतिदिनं वाहनारोहणादिकं कुर्यात् ।

वाहनारोहणक्रमस्तु— प्रथमे शिबिकायानं द्वितीये शेष-पीठिका । तृतीये चन्द्रबिम्बं च दिवा चेत्सूर्यमण्डलम् ॥ चतुर्थे दिवसे प्राप्ते पुष्पमण्टपवाहनम् । पञ्चमे दिवसे प्राप्ते गरुडारोहणं

भवेत् ॥ इत्युक्तक्रमेण पञ्चदिनान्तं वाहनारोहणं कृत्वा षष्ठे दिने रात्रौ देवस्य बल्यन्तमर्चनं कृत्वा उत्सवबिम्बमास्थानमण्टपे भद्रासने सिंहासने वा समारोप्य पुरतस्तस्य शोधिते भूतले धान्यपीठे चूर्णं कुम्भं विन्यस्य पुण्याहजलेन प्रोक्ष्य, तत्र श्रियमावाह्य अभ्यर्च्य सदर्भाहतवस्त्रेणाच्छाद्य तत्र रक्षार्थं चक्रं नियोज्य देवमर्घ्याद्यैर्हविरन्तैरुपचारैरभ्यर्च्य हरिद्राचूर्णमादाय श्रीसूक्तेन देवमभिषिच्य तत्र मण्टपस्यैकदेशे शालितण्डुलनिर्मिते पीठे सौवर्णीं राजतीं ताम्रजां वा त्रिद्विकरायतां, ऊर्ध्वे तदर्धविस्तृतां वृत्तायतां, अधोभागे प्रणाळेन समन्वितामुन्मत्तकुसुमाकारां बिम्बमानानुरूपां जलद्रोणिं निवेश्य तां गाळितोदकेनापूर्य कुङ्कुमचन्दनकर्पूरचूर्णकुसुमैः तदुदकं सुरभीकृत्य तत्पार्श्वे देवमानीय अर्घ्यादिभिरभ्यर्च्य घण्टाभेरीपटहमङ्गळवाद्यघोषश्रुतिस्तुतिघोषैस्सह पुंसूक्तेन उत्सवबिम्बस्य तज्जलद्रोण्यामवगाहनं कृत्वा उद्धृत्य, आर्द्रवाससा सह देवं याने समारोप्य कुङ्कुमेनापादमस्तकावधि समालिप्य वरुणप्रीतये पश्यतां सर्वजनानां पवित्रीकरणाय च देवं ग्रामप्रदक्षिणं नीत्वा पुनर्मण्टपे निवेश्य स्नानवस्त्रादिसकलमाचार्यस्स्वयमाहृत्य देवं वस्त्रभूषणमाल्यादिभिरलंकृत्य गजारोहणपूर्वकमुत्सवं कुर्यात् । सप्तमे दिवसे प्रातर्नित्यार्चनं बल्यन्तं कृत्वा पूर्वमेव प्रतिष्ठितं मुक्तावितानसौवर्णमञ्जरीगणमुक्तादामपुष्पमालाहैमवितानध्वजपताकाद्यैस्सौवर्णकुम्भशिखरैरलंकृतं मध्यविन्यस्तसौवर्णभद्रपीठं सर्वलक्षणसंयुक्तं रथं पञ्चगव्यपुण्याहवारिभिस्संप्रोक्ष्य रथस्य पादादूर्ध्वान्तं स्थितान् देवानर्घ्यादिभिरभ्यर्चयेत् । पादचक्रेषु वह्न्यादीशानान्तं सत्यसुपर्णगरुडतार्क्ष्यानन्यत्र प्रागादिषु विहगेश्वरं चक्रदण्डद्वये मायां चक्रेषु शशिभास्वरौ आधारेऽनन्तं भाराख्यदण्डद्वये विश्वरूपधरं विष्णुं शक्तीशं च परितः पङ्क्तिकाजालके केशवादीन् गात्रेषु गात्रपादेषु च धर्माद्यष्टकं गात्रान्तरालेषु चक्राद्यायुधानि रथाग्रस्थूपिकायां सदा हरिं कूटशालासु वासुदेवादीन् वेदिकातले

एकशृङ्गादीन् द्वादशग्रीवायां कूर्मादिद्वादशकं शिखरेऽनन्तादिद्वादशकं सर्वेषामूर्ध्वे ध्रुवं पद्मनाभं चाभ्यर्च्य रथस्य चतुर्दिक्षु चण्डाद्यष्टकं रथस्य परितः कुमुदादीनि ब्रह्मादींश्चाभ्यर्च्य रथं गरुडरूपिणं ध्यात्वा गरुडमन्त्रेणार्घ्यादिभिर्हविरन्तमभ्यर्च्य चण्डादिद्वारपालानां कुमुदादीनां इन्द्रादीनां च रथस्य परितो बलिं दत्वा मन्दिरान्तःप्रविश्य श्रीपुष्टिभ्यां सहोत्सवबिम्बं यानमारोप्य आस्थानमण्टपे ब्रह्मविष्टरे समारोप्य अर्घ्यादिभिरभ्यर्च्य रथयात्रानिर्विघ्नसिद्ध्यर्थं विविधबीजानि फलानि हिरण्यानि दध्योदनं च देवस्य संनिधौ यात्रादानपूर्वकं विप्रेभ्यो दत्वा पादुके विनिवेद्य देवं देवीभ्यां सह यानमारोप्य घण्टाशङ्ख-काहळभेरीपटहवादित्रमङ्गळघोषनृत्तगीत जयशब्दवेदघोषादि यात्रोप-करणैस्सह प्रथमावरणमारभ्य रथ्यावरणान्तं देवं प्रदक्षिणं परिभ्राम्य रथसमीपं नीत्वा रथं च प्रदक्षिणीकृत्य सुमुहूर्ते देवं रथमारोप्य रथोर्ध्वे भद्रविष्टरे देवं निवेश्य अर्घ्यपाद्याचामगन्धमाल्यदीपधूपार्हण-मधुपर्कविविधनैवेद्य पृथुकपानकतर्पण ताम्बूलमुखवासैर्देवमभ्यर्च्य तत्काले पुत्रकामानां स्त्रीणामारोग्यमिच्छतां जनानां च निवेदितान्नं कबलीकृत्य देवसंनिधौ दद्यात् । आचार्यास्साधकाश्च रथोर्ध्वस्थले तस्याधस्तात्स्थले छत्रधारकाः तत्पार्श्वद्वये मायूरछत्रधारिणौ, अग्रतः चामरधारिणौ मध्ये सारथिश्चोपतिष्ठेयुः । ततो रथं ग्रामे नगरे पत्तने वा सर्ववीथीषु प्रादक्षिण्येन भ्रामयित्वा रथं यथास्थानं नीत्वा रथाद्देवमवरोप्य यानान्तरे समारोप्य स्वस्थाने संनिवेशयेत् । अष्टमे दिवसे प्रातःकाले तद्रात्रौ देवं डोलारोहणपूर्वकमश्वोपरि समारोप्य, मृगयां कारयित्वा, मध्यमार्गे भक्तपरित्राणलीलां च कारयित्वा, ब्राह्मे मुहूर्ते नगरशोधनपूर्वकं देवस्य उत्सवं कृत्वा देवस्य देव्योश्च मिथः प्रणयकलहलीलां क्षम्यतामित्युच्चरन् उभयोस्संधानं च कुर्यात् । नवमे दिने अवभृतपूर्वकं रात्रौ देवस्य शिबिकोत्सवं कुर्यात् । इति वाहनारोहणक्रमः । एवं, अपूर्वाभरणैर्माल्यैरपूर्वैश्चाम्बरैस्तथा । अपू-

वीथ्यानयानाद्यैः यथा कौतूहलं भवेत् । तथा विशेषः कर्तव्यो यावत्तीर्थदिनावधि ॥ इत्युक्तप्रकारेण प्रतिदिनं देवं तोषयेत् । अथ नवमे दिने कर्तव्यावभृतक्रमः । आचार्यो मूर्तिपैस्सह भगवद्गेहं प्रविश्य बलं तमभ्यर्च्य प्रासादान्तःप्रविश्य मूलबिम्बस्य पादयोः प्रणम्य तत्पुरतस्तीर्थबिम्बमानीय तदभावे नित्यस्नपनार्चां बल्यर्चां वा आनीय मूलबिम्बात्तत्र किञ्चिदावाह्याभ्यर्च्य तीर्थबिम्बं समादाय घण्टावाद्यरवैस्सह ध्वजपीठसमीपं गत्वा, शोधितेऽलंकृते मण्टपे तत्र स्नानविष्टरे तीर्थबिम्बं मूलबिम्बाभिमुखं संनिवेश्य वक्ष्यमाणाधमाधमसंज्ञं स्नपनं तत्र परिकल्प्य बिम्बस्य पुरतः ध्यानपीठे उलूखलं निक्षिप्य, तस्योपरि चतुर्दिक्षु चत्वारि मुसलानि निक्षिप्य उलूखले मुसलं न्यस्य दूर्वाकाण्डेन बध्वा, नववस्त्रेण संवेष्ट्य सौवर्णचूर्णसंमिश्रगन्धसंयुक्तं हरिद्राचूर्णमुलूखले निक्षिप्य चतुर्भिर्ब्राह्मणैर्वैष्णवीभिर्वा मङ्गळगानवाद्यघोषपुरस्सरं आचूर्णावघातं कारयित्वा तच्चूर्णान्यादाय सौवर्णादिकुम्भे समापूर्य ससूत्रं कुंभं वस्त्रेणावेष्ट्य स्नपनद्रव्यपुरोभागे तदुत्तरभागे वा तण्डुलपीठे कुंभं विन्यस्य अथवा पञ्च नव वा तादृशान्चूर्णान्कलशान्विन्यस्य, तत्र श्रियमावाह्याभ्यर्च्य, अनन्तरं देवं तैलेनाभ्यज्य समुद्धृत्य पाद्याद्यैः प्रधानकलशैस्संस्नाप्य देवमर्घ्यादिभिरभ्यर्च्य हरिद्राचूर्णैः श्रीसूक्तेनाभिषिच्य शुद्धवारिणा सहस्रधारया संस्नाप्य, अधरोत्तरवस्त्रे समर्प्य विशेषेणालंकृत्याभ्यर्च्य मुद्गान्नपायसान्नादीनि निवेद्य शिबिकायां समारोप्य तथैव श्रीपुष्टिभ्यां सहोत्सवबिंबं च शिबिकादौ समारोप्य, अलंकृत्य तीर्थबिम्बपुरस्सरं उत्सवबिम्बं छत्रचामरशङ्खादिसर्वसाधनैस्सह सर्वेष्वावरणेषु प्रदक्षिणं भ्रामयित्वा तीर्थपार्श्वं समासाद्य तत्तीरे मण्टपे प्रपायां वा भद्रासने उत्सवबिम्बं संनिवेश्य तत्पुरतः स्नानपीठिके तीर्थबिम्बं विन्यस्य पञ्चविंशतिभिर्द्वादशभिर्नवभिर्वा कलशैर्देवमभिषिच्य पूर्ववच्चूर्णैश्चाभिषिच्य अर्घ्याद्यैस्संपूज्य, बिम्बं परिमृज्य, भगवद्भुक्तावशिष्टं

तच्चूर्णमादाय भक्तानां मूर्ध्नि दापयित्वा पुण्याहं वाचयित्वा तज्जलैः तीर्थं संप्रोक्ष्य तीर्थे सर्वतीर्थानि समावाह्य पौराणिके तीर्थे तीर्थमेव समभ्यर्च्य, आचार्य उत्सवबिम्बसमीपं गत्वा, तत्पादयोः प्रणम्य, तदनुज्ञया मध्यंगते सूर्ये, सुमुहूर्ते तीर्थबिम्बमादाय घण्टाशङ्खरवैस्सह स्ववामहस्ततले क्ष्मामण्डलगतमिव विन्यस्य दक्षिणपाणिना बिम्बस्य मध्यभागं गृहीत्वा तीर्थतीरमासाद्य महासङ्कल्पं कृत्वा राज्ञोराष्ट्रकस्य आशीर्वचनपूर्वकं जलमध्यमासाद्य नाभिदघ्ने जले स्थित्वा मूलमन्त्रं जपन् हृदि अच्युतं ध्यायन् बिम्बेन सह निमज्जयेत् । तदा सर्वेऽपि भक्ताः भागवताः देवेन सह निमज्जेयुः । स्वयं व्यक्तादिके स्थाने तु मुहूर्तातिक्रमदोषाभावात् मध्याह्नेऽपराह्ने रजन्याः पूर्वभागे वा एवमवभृतं कुर्यात् । तत्तीर्थबिम्बं तीरमण्टपमानीय विष्टरे समारोप्य धौतवस्त्रद्वयं समर्प्य, स्नानवस्त्रं देशिकस्स्वयमादाय तत् मूर्ध्नि धारयेत् । ततो देवमलंकृत्य उत्सवबिम्बं प्राग्वदर्घ्यादिभिरभ्यर्च्य हविर्निवेदनं कृत्वा प्रतिदिनं सहस्रब्राह्मणान् अथवा शतसंख्याक-ब्राह्मणान् भोजयेत् । ततो देवं यानमारोप्य मन्दिरान्तःप्रवेश्य, तीर्थबिम्बगतां शक्तिं मूलबेरे विसर्जयेत् ।

अथ सायंकाले संप्राप्ते श्रीभूमिभ्यां सह उत्सवबिम्बमलंकृत्य शिबिकादौ समारोप्य यात्रोपकरणैस्सह ग्रामप्रदक्षिणमुत्सवं कृत्वा, मन्दिरान्तः प्रवेशयेत् । बलिपीठसमीपे देवमर्घ्यादिभिरभ्यर्च्य, मधुपर्कापूपादीन् शीतळं तर्पणजलं तांबूलादींश्च निवेद्य धामप्राद-क्षिण्येन महामण्टपं नीत्वा, तत्र सिंहविष्टरे देवं प्राङ्मुखमुदङ्मुखं वा संनिवेश्य अर्घ्यादिभिरभ्यर्च्य, स्थानस्य राज्ञो राष्ट्रस्य यजमानस्य मन्त्रिणाम् । प्रजानां परिवाराणां वैष्णवानां विशेषतः ॥ आशीर्वादं ततः कुर्याद्वीक्षमाणो विभोर्मुखम् । ओमित्येवं प्रतिब्रूयुस्सर्वे देवस्य संनिधौ ॥ इत्युक्तप्रकारेण आशीर्वचनं कृत्वा देवं यागशालां प्रवेश्य

तत्र पश्चिमवेद्यां देवं समारोप्य यथाविधि कुम्भपूर्वकं चतुस्स्थानार्चनं हविरन्तं कृत्वा, पूर्णाहुत्यनन्तरं कुम्भस्थितदेवं हृदि विसृज्य, तथैव मण्टपस्थं देवं च विसृज्य, बलिदानपूर्वकं द्वारस्थानदेवांश्च विसृज्य उत्सवबिम्बं तत्पुरतो महाकुम्भं च वाहयन् स्वयं करकास्त्रं समादाय पुरतोऽच्छिन्नधारां सिञ्चन् धाम प्रदक्षिणीकृत्य प्रासादसमीपं गत्वा उत्सवबिम्बं मूलबिम्बस्य संमुखं संनिवेश्य उभयोर्मध्ये महाकुम्भं विन्यस्य देवमर्घ्यादिभिरभ्यर्च्य, पुंसूक्तेन महाकुम्भस्थतोयैः मूलबिम्बमुत्सवबिम्बं च संप्रोक्ष्य महाकुम्भगतं देवं मूलबिम्बे संयोज्य करकास्त्रगतां शक्तिमायुधेषु संयोज्य, उपकलशगतान् वासुदेवादीन्मूलबिम्बस्य परितः पीठोर्ध्वे संयोजयेत् ।

तत्काले भगवत्समर्पिते दुकूलवस्त्रविविधमालासुगन्धचन्दनादिभिस्सविशेषं गुरोस्सन्मानं कुर्यात् । आचार्योऽर्पितान् स्वयमादाय दुकूलाद्यं स्वशिरस्युष्णीषवत् बध्वा, माल्यादींश्च यथायोगं धृत्वा, दण्डवत्प्रणिपत्य देवस्य पादयोः पुष्पाञ्जलिं समर्प्य पुनः प्रणम्याञ्जलिं बध्वा, सर्वं न्यूनातिरिक्तं च मया पूर्वं हि यत्कृतम् । तत्सर्वं देवदेवेश क्षन्तुमर्हसि मां विभो ॥ इति विज्ञाप्य देवस्य करस्थं कौतुकं हृन्मन्त्रेण विसृज्य, एवमेव सर्वेषां कौतुकसूत्रं च विसृज्य, उत्सवबिम्बं स्वस्थाने संनिवेश्यार्घ्याद्यैरभ्यर्च्य, अपूपोपहारान्निवेद्य, शय्यासनं समर्प्य, रात्रिशेषं समापयेत् ।

तदन्येद्युराचार्यः स्वनित्यकर्म निर्वर्त्य मूर्तिपैस्सह देवं गेहान्तः प्रविश्य नित्यार्चनं निर्वर्त्य वक्ष्यमाणाधमोत्तमस्नपनेन देवं संस्नाप्य हविरन्तमभ्यर्च्य, सायंकाले नित्यपूजान्तं कृत्वा देवस्याग्रे स्थित्वा, विज्ञापनमथाचरेत् ।

भगवन् पुण्डरीकाक्ष शरणागतवत्सल । अङ्कुरार्पणमारभ्य उत्सवावभृतान्तिमम् ॥ यन्मयाऽनुष्ठितं कर्म तव संप्रीतये विभो ।

तदाऽन्यैर्मदनुज्ञातैर्देशिकैश्चापि यत्कृतम् ॥ साधकैश्च तथाऽन्यैश्च विविधैः परिचारकैः। तत्तत्संपूरणार्थं च न्यूनाधिक्योपशान्तये ॥ त्वामद्य वासरे यष्टुं पुष्पयागविधानतः। प्रवृत्तमनुजानीहि मदनुग्रहकाम्यया ॥ इति विज्ञाप्य तदनुज्ञां लब्ध्वा उत्सवबिम्बं देवीभ्यां सह भद्रविष्टरे समारोप्य विशेषेणालंकृत्य तत्पुरतो नानावर्णैः कुसुमैः तुळसीदळैश्च मण्डलमालिख्य मण्डलस्यैशानभागे महाकुम्भं च विन्यस्य मण्टपस्य चतुर्दिक्षु द्वारकुम्भाष्टकं च संस्थाप्य वितानध्वजतोरणादिभिर्मण्टपमलंकृत्य ततः पुष्पाङ्कुरं कुर्यात्। मण्डलोत्तरभागे यथाविधि सूत्राण्यास्फाल्य तत्र ध्यानपीठे विभवेच्छानुसारेण पालिकादिपात्राणि केवलपालिकापात्राणि वा प्रक्षाळितान्यलंकृतानि कुशानि पूरितबिलानि विन्यस्य तण्डुलैरापूर्य, पुण्याहं वाचयित्वा, पालिकाद्यधिदेवतांश्च पूर्ववत्संपूज्य तेषु पुष्पाणि पूर्ववद्वापयेत्। अत्र सोमकुम्भार्चनं होमं च वर्जयेत्। ततो मूलबिम्बादीनां यथाविधि रक्षासूत्रं बध्वा, उत्सवबिम्बं मृद्वास्तरणशोभिते पुष्पमण्डलमध्ये प्राङ्मुखं संनिवेश्य तस्य पार्श्वद्वये श्रियं पुष्टिं च विन्यस्य कुम्भपार्श्वमासाद्य यथाविधि मानसयागान्तं कृत्वा, द्वारयागं च विधाय महाकुम्भे मूलबिम्बात्किञ्चिदावाह्याभ्यर्च्य करकास्त्राद्यर्चनं च प्राग्वदेव कृत्वा ततो बिम्बसंनिधिं गत्वा, अर्घ्यादिनीराजनान्तालंकारासनोपचारैरभ्यर्च्य, पुनरर्घ्यपाद्याचामगन्धमालादीपधूपार्हणापूपपृथुकतर्पणनारिकेळोदकमुखवासताम्बूलाद्युपचारैः द्वादशवारं देवं अभ्यर्च्य महाहविर्निवेद्य पुष्पाधिवासं कुर्यात्। देवस्य पुरतो ध्यानपीठे सौवर्णं राजतं वा पात्रं पुष्पपूरितं विन्यस्य पुण्याहं वाचयित्वा प्रोक्ष्य मूलमन्त्रेणाभ्यर्च्य वस्त्रेणाच्छाद्य यागगेहं गत्वा, कुण्डं तत्राग्निं च संस्कृत्य, अग्निमध्ये देवमावाह्य सप्तसमिद्भिः काम्यद्रव्यैश्च यथाविधि हुत्वा, पूर्णाहुत्यादिकं कृत्वा, आवाहितं देवं हृदि विसृज्य, संपाताज्यमादाय देवस्य संनिधिं गत्वा होमं समर्प्य,

संपाताज्येन पुष्पाणि संसिच्य पुंसूक्तेन देवस्य पादयोः पुष्पाणि समर्प्य, अष्टाक्षरबीजानि हृदादिमन्त्रान् भूषणान्यायुधानि श्रियं पुष्टिं खगेश्वरं परिवारांश्च समुद्दिश्य देवस्य पादयोः पुष्पाणि दत्वा ततो देवं यानमारोप्यालंकृत्य यात्रोपकरणैस्सह प्रथमावरणादिषु ग्रामवीथीषु च देवस्योत्सवं कृत्वा ध्वजपीठसमीपे देवमर्घ्यादिभिरभ्यर्च्य ध्वजस्थानमासाद्य गरुडमर्घ्यादिभिरभ्यर्च्य हविर्निवेद्य ध्वजस्थं गरुडं हृदि विसर्ज्य ध्वजमवरोप्य ध्वजदण्डं तत्पीठं तत्प्रपां यागोपकरणानि च आचार्यस्स्वयमादद्यात्। ततो देवं प्रथमावरणे द्वितीयावरणे वा मण्टपे भद्रविष्टरे प्राङ्मुखे उदङ्मुखे वा निवेश्य भगवदुत्सवे मङ्गळाशासनार्थं लोकान्तराद्देशान्तरात् समागतान् देवान् भक्तान् भागवतांश्च भगवदनुज्ञापूर्वकं विसृज्य देवमन्तःप्रवेश्य, देवं देवीभ्यां सह मूलबिम्बाभिमुखं निवेश्य, उभयोर्मध्ये महाकुम्भं च विन्यस्य कुम्भप्रोक्षणादिकं सर्वं रक्षासूत्रविसर्जनान्तं प्राग्वद्यथाविधि कृत्वा, देवमन्तःप्रवेश्यार्घ्यादिभिरभ्यर्च्य उत्सवबिम्बगतां शक्तिं मूलबिम्बे संयोज्य शय्यासनं समर्प्य, रात्रिशेषं जागरेण नीत्वा ब्राह्मे मुहूर्ते देशिकोऽमुकैः परिजनैस्सह उद्वासनबलिं दत्वा ग्रामेऽप्यावाहितान् कुमुदादिगणान् विशेषबलिदानेन संतोष्य विसृज्य महातटाकं नदीं वा गत्वा तत्राचार्यस्सर्वैः परिजनैस्सह स्नात्वा नित्यकर्माणि निर्वर्त्य, मङ्गळवाद्यघोषैस्सह भगवदालयमासाद्य देवस्य नित्यपूजादिकं कुर्यात्।

यजमानो गुरुं वस्त्रैः सौवर्णकटकादिभूषणगन्धमाल्यैरलंकृत्य, अभ्यर्च्य तस्मै शतनिष्कान्वितां ततोऽधिकां वा उत्तमां दक्षिणां तदर्धं तदर्धं वा यथाशक्ति दत्वा तदर्धं ऋत्विग्भिस्तदर्धं परिचारकेभ्यश्च दत्वा वेदपाठकान् प्रबन्धगायकानन्यांश्च यथाशक्ति दक्षिणाभिस्तोषयित्वा तत्काले आचार्यं वस्त्रस्रक्चन्दनादिभिरलंकृत्य शिबिकायामारोप्य देशिकं देववत्स्मृत्वा, शङ्खकाहळवादित्रभेरी-

पटहरवैः छत्रचामरदीपैर्वेदघोषैस्सह ग्रामप्रादक्षिण्येन स्वगृहं प्रवेशयेत् ।

एवं हि देवदेवस्य उत्सवं कारयेत्तु यः ।
इह लोके सुखं प्राप्य परलोके महीयते ॥

इति कौशिककुलतिलकस्य श्रीपाञ्चरात्रपारावारपारीण फणिपुरं केशवभट्टाचार्यतनुजन्मना फणिपुरं रङ्गस्वामिभट्टाचार्येण विरचितः महोत्सवप्रयोगः ।



देवताह्वानश्लोकाः

ओं नमस्सकलकल्याणदायिने चक्रपाणये ।
विषयार्णवमग्नानां समुद्धरणहेतवे ॥

श्रीमद्ज्ञानजनाश्रयेश्वरविभोः श्रीमद्ध्वजारोहणे
संप्राप्ते नववासरोत्सवविधौ धर्मादिसेवार्थिने ।
नाळीकासनमुख्यनागसदसामावाहनार्थं परं
भेरीताडनमातनोमि विदुषां मोक्षप्रदं पश्यताम् ॥ १ ॥

शङ्खश्चक्रं गदाब्जं मुसलमसिवरः कार्मुकं दिव्यबाणा
विष्णोरष्टायुधीयं प्रचुरतरनिजालोकपूर्णाखिलाशा ।
दृप्यद्रक्षोनिहन्त्री त्रिदशसमुदया भीतिदात्री सुगात्री
श्रीभूमीशस्य विष्णोस्त्वरितमिह समायातु दिव्योत्सवार्थम् ॥ २ ॥

शेषश्शीर्षोज्ज्वलद्भिर्मणिवरनिकरैर्भूषितस्स्वैश्चतुर्भिः
दोर्भिर्बिभ्रद्रथाङ्गं हलमुसलधरान् श्रीशकैङ्कर्यधुर्यः ।
प्रोद्यत्ताराधिनाथः प्रतिभटघृणिभिर्नित्यसूर्यग्रगण्य-
श्रीभूमीशस्य विष्णोस्त्वरितमिह समायातु दिव्योत्सवार्थम् ॥ ३ ॥

शङ्खं शीर्षे हिमाभं स्फटिकमणिनिभं वामपाणावनन्तं
कार्कोटं धूम्रदेहं हृदि च कटतटे तक्षकं पिङ्गळाङ्गम् ।
पद्मौ पद्माभपिङ्गौ श्रवणतटयुगे वासुकिं यज्ञसूत्रं
शोणाभं दोर्ण्यवामे गुळिकमणिनिभं बिभ्रतायास्तु तार्क्ष्यः ॥ ४ ॥

विष्वक्सेनः किरीटी हरिमणिसदृशः पूर्वहस्तद्वयाब्जे
मुद्रां कौमोदकीं चापरकरयुगळे शङ्खचक्रे दधानः ।



नारायणाचलोत्तुङ्गशृङ्गशृङ्गारमूर्तये ।
रामानुजार्यपुत्राय सम्पत्पुत्राय मङ्गळम् ॥

पीनाङ्गो लम्बकुक्षिः प्रतिभटभयकृत्पिङ्गळश्मश्रु रस्य
श्रीभूमीशस्य विष्णोस्त्वरितमिह समायातु दिव्योत्सवार्थम् ॥ ५ ॥

राकाचन्द्रप्रवाळद्रुतकनकमहानीलसङ्काशगात्रा
वेतण्डास्यश्च कालप्रकृतिरपि जयत्सेनसिंहाननाद्याः ।
चत्वारो मन्त्रिणोऽमी भुजगशयगणाधीशितुश्चण्डरूपा
श्श्रीभूमीशस्य विष्णोस्त्वरितमिह समायान्तु दिव्योत्सवार्थम् ॥ ६ ॥

देवैर्दैत्यैस्समेतौ सुकुमुदकुमुदाक्षाह्वयौ पुण्डरीकः
साकं सङ्घैः पितृणां निशिचरभुजगैर्वामनश्शङ्कुकर्णः ।
गन्धर्वैस्सर्वनेत्रस्समुखसमभिदो यक्षपैस्सुप्रतिष्ठः
पैशाचैस्साकमेतैस्त्वरितमिह समायान्तु दिव्योत्सवार्थम् ॥ ७ ॥

भूषावेषाभिरामौ शुभतरवसनौ दिव्यगन्धानुरागौ
सेवाहेवाकवन्तौ सरसिजनिलयाभक्तिरत्युग्रवीर्यौ ।
भूमिस्थैस्सिद्धसङ्घैस्सततमनुसृतौ मानवपृश्निगर्भौ
श्रीभूमीशस्य विष्णोस्त्वरितमिह समायान्तु दिव्योत्सवार्थम् ॥ ८ ॥

ये विष्णोः पारिषद्याः निखिलभुवनगाः प्रोद्भटाश्चोत्कटाद्याः
ते कृत्स्नाश्श्वेतमृत्स्ना विरचितनिटिलभ्राजमानोर्ध्वपुण्ड्राः ।
शङ्खं चक्रं च पाशाङ्कुशमुसलगदान् बिभ्रतो बाहुदण्डैः
श्रीभूमीशस्य विष्णोस्त्वरितमिह समायान्तु दिव्योत्सवार्थम् ॥ ९ ॥

पूर्वाचार्यश्शठारिः कलिमथनसरोयोगिभूताभिधाना
भ्रान्ताख्यौ भक्तिसारश्शुभतरचरितौ भट्टभक्ताङ्घ्रिरेणू ।
कोलेशो योगिवाहो मधुरकविवरो नाथपाथोरुहाक्षौ
रामश्श्रीयामुनार्यो यतिनृपतिमुखाश्शीघ्रमायान्तु सर्वे ॥ १० ॥

केचित्सालोक्यभाजः कतिचनकमलाधीशसारूप्यभाजः
केचित्सामीप्यभाजः कतिच्चिदनिमिषप्रार्थ्यसायुज्यभाजः ।
वैकुण्ठस्थानभाजो निरवधिभगवद्भक्तयो मुक्तवर्गाः
श्रीभूमीशस्य विष्णोस्त्वरितमिह समायान्तु दिव्योत्सवार्थम् ॥ ११ ॥

ब्रह्मा स्वर्णाभिगात्रः करतलविलसत्कुण्डिकस्साक्षमालः
सौम्यैर्वक्त्रैश्चतुर्भिर्जलनिधितनयावल्लभं संस्तुवानः ।
युक्तो देवैर्मरीच्याद्यखिलमुनिजनैर्दिव्यहंसाधिरूढः
श्रीभूमीशस्य विष्णोस्त्वरितमिह समायातु दिव्योत्सवार्थम् ॥ १२ ॥

फालाक्षश्शूलपाणिः करधृतडमरुश्चोक्षवाहाधिरूढो
नक्षत्राधीशमौळिर्भसितसिततनुर्हैमवत्या समेतः ।
सार्धं वेताळसार्थैः प्रमथसमुदयैः स्कन्दलम्बोदराद्यैः
श्रीभूमीशस्य विष्णोस्त्वरितमिह समायातु दिव्योत्सवार्थम् ॥ १३ ॥

सुत्रामा चित्रभानुर्द्युमणितनुभवो यातुराट्पाशपाणिः
वायुर्यक्षाधिनाथः क्षितिधरतनयावल्लभोऽष्टौ दिगीशाः ।
पुत्रैर्मित्रैःकळत्रैर्निखिलपरिजनैर्वाहनैस्साकमेते
श्रीभूमीशस्य विष्णोस्त्वरितमिह समायान्तु दिव्योत्सवार्थम् ॥ १४ ॥

मार्ताण्डश्शीतलांशुर्धरणितनुभवो रौहिणेयस्सुरार्यो
दैत्याचार्यस्सरोजप्रियतनयतमःकेतवो राशिवर्गाः ।
दाक्षायिण्यो मरीचिप्रभृतिऋषिवरैस्साकमौत्तानपाद
स्सर्वेऽप्यायान्तु शीघ्रं जलनिधितनयानाथदिव्योत्सवार्थम् ॥ १५ ॥

आदित्या रुद्रदेवाः पितृवसुमरुतस्साध्यसप्तर्षिसिद्धा
विश्वे देवाश्च विद्याधरवरनिकराः किन्नरा दस्रयक्षाः ।
गन्धर्वा गुह्यकेन्द्राश्शुभनवनिधयश्चाप्सरस्त्रीनिकायाः
श्रीभूमीशस्य विष्णोस्त्वरितमिह समायान्तु दिव्योत्सवार्थम् ॥ १६ ॥

वारास्ताराश्च योगास्स्थितिकरणविधाराज्ञिसन्ध्यानिशीथाः
पक्षौ मासर्तवोऽब्दाः विषुवदपि तथा संक्रमाश्चायने द्वे ।
त्रुट्याद्याः कालभेदास्सकलयुगपरार्धाख्यमन्वन्तराद्याः
श्रीभूमीशस्य विष्णोस्त्वरितमिह समायान्तु दिव्योत्सवार्थम् ॥ १७ ॥

अत्रिर्व्यासो वसिष्ठः कुशिकतनुभवः काश्यपः कण्वसंज्ञो
मार्कण्डेयो मरीचिस्सनकमुनिवरश्शौनको जामदग्न्यः ।
भारद्वाजः पुलस्त्यो द्रुहिणसुतमुनिश्चापि वल्मीकजन्मा
जाबाली भृग्वगस्त्यौ मुनिवरनिकराश्शीघ्रमायान्तु सर्वे ॥ १८ ॥

वेदास्सर्वेऽपि मन्त्रास्ततिरुपनिषदां चापि शिक्षा च कल्पो
ज्योतिश्छन्दो निरुक्तः फणिपतिफणितिश्चापि काणादवाणी ।
मीमांसाशास्त्रयुग्मस्मृतिवचनपुराणागमास्सेतिहासाः
श्रीभूमीशस्य विष्णोस्त्वरितमिह समायान्तु दिव्योत्सवार्थम् ॥ १९ ॥

अग्निष्टोमोऽतिरात्रो निखिलमखवरा राजसूयाश्वमेधा-
वप्तोर्यामाभिदोद्यौ स्सुरजनमहितो विश्वजित्पौण्डरीकः ।
सर्वे काम्येष्टयोऽन्ये निखिलमखवराः पञ्चयज्ञाश्च सर्वे
श्रीभूमीशस्य विष्णोस्त्वरितमिह समायान्तु दिव्योत्सवार्थम् ॥ २० ॥

विन्ध्यस्सह्यो महेन्द्रो मलयगिरिवरश्शक्तिमानृक्षसंज्ञः
श्रोणीभृत्पारियात्रो निषदसमभिधो मन्दरश्चित्रकूटः ।
मेरुः कैलासशैलो विपुलधरणिभृद्धेमकूटस्त्रिकूटो
ये चान्ये शैलवर्गाः त्वरितमिह समायान्तु दिव्योत्सवार्थम् ॥ २१ ॥

गंगा तुंगा च भद्रा दिनकरतनया गण्डकी स्वर्णरेखा
कावेरी ताम्रपर्णी शुभतरसरयूर्बाहुदा नर्मदाख्या । पुण्यतीर्थानि
याश्चान्याः पुण्यनद्यो निखिलनदवराः पुष्करिण्यस्सरांसि
श्रीभूमीशस्य विष्णोस्त्वरितमिह समायान्तु दिव्योत्सवार्थम् ॥ २२ ॥

रङ्गं श्रीमुष्णसंज्ञं वृषभधरणिभृन्नैमिशं पुष्कराख्यं
सालिग्रामं च तोताद्र्यधरणिधरश्रीबदर्याश्रमं च ।
काशी काञ्ची ह्यवन्ती शुभतरमथुरा द्वारकापुर्ययोध्या
माया चायान्तु शीघ्रं जलनिधितनयानाथदिव्योत्सवार्थम् ॥ २३ ॥

ये देवाः पर्वतस्थाः जलधिनदनदीतीरसंस्थानभाजो
दिव्यक्षेत्रस्थिता ये विविधवनगताः पुण्यतीर्थाश्रिताश्च ।
ग्रामप्रासादभाजः पुरनिलयगता भूमिपालाश्रितास्ते
सर्वेऽप्यायान्तु शीघ्रं जलनिधितनयानाथदिव्योत्सवार्थम् ॥ २४ ॥

वास्त्वीशः क्षेत्रपालो जलनिधितनयाताक्ष्र्यचण्डप्रचण्डा
स्सर्वे दौवारिकेन्द्रा निखिलशुभकराश्श्रीविमानाधिदेवाः ।
ये चान्तर्मण्डलाद्यावरणपरिगता गोपुरस्थाश्च देवाः
श्रीभूमीशस्य विष्णोस्त्वरितमिह समायान्तु दिव्योत्सवार्थम् ॥ २५ ॥

भोगीशोऽनन्तनामा गुलिकसमभिधो वासुकिस्तक्षकाख्यः
कार्कोटश्शङ्खपालो भुजगपरिबृढौ सन्महापद्मपद्मौ ।
एतेऽष्टौ पन्नगेन्द्रा बलिसदनगतैस्साकमन्यैर्भुजङ्गैः
श्रीभूमीशस्य विष्णोस्त्वरितमिह समायान्तु दिव्योत्सवार्थम् ॥ २६ ॥

इन्द्रः कालो नियन्ता वियदपि निखिलाश्शास्त्रविद्याधिनाथाः
प्राजापत्यस्समूहश्शिवऋषिनिकरास्सग्रहा येऽघनागाः ।
सर्वेऽप्यौषध्य एताः पशुमुखधरणीपावकोष्णांशुविद्याः
तोयं वायविन्दुविद्यास्त्वरितमिह समायान्तु दिव्योत्सवार्थम् ॥ २७ ॥

नाकस्थाः क्षोणिभाजो बलिसदनगता ये च लोकान्तरस्थाः
श्रीवैकुण्ठस्थिताश्च स्थिरचरनिकरास्संयुता दिव्यवेषैः ।
श्रीभूमीशस्य विष्णोर्विजयमिह महारम्भभेरीनिनादं
श्रुत्वा हृष्टाः प्रहृष्टास्त्वरितमिह समायान्तु दिव्योत्सवार्थम् ॥ २८ ॥

स्वामिन्नाश्रितलोकरक्षकविभोर्दिव्योत्सवे श्रीमतः
सेवार्थं समुपागतान् बलरिपून् ब्रह्माद्यमर्त्येश्वरान् ।
नानालोकभवान् चराचरगणान् सर्वानिमान् प्राञ्जलीन्
ईक्षस्वाम्बुधिकन्यया सह कृपातुङ्गैरपाङ्गैश्शुभैः ॥ २९ ॥

ब्रह्माद्या निर्जरौघाः कुमुदमुखगणाश्शेषशेषासनाद्याः
नित्या मुक्ताश्च सक्ता भगवति सततं ये च चैतन्ययुक्ताः ।
एते सर्वेऽपि सेनापरिबृढवशगास्सायुधैर्वाहनाद्यैः
साकं श्रीपुष्पयागान्तमिह वसतिं प्राप्नुवन्तु प्रहृष्टाः ॥ ३० ॥

सिंहास्या घोटवक्त्राः करटिकिटिमुखाः व्याघ्रराड्व्याळतुण्डाः
प्रोच्चण्डास्साट्टहासास्तरळतरदृशः पारिषद्यास्त्वसङ्ख्याः ।
विष्वक्सेनाज्ञयाऽमी त्रिदशदनुसुताधीशरक्षोधिपानां
रक्षां शिक्षां च कर्तुं त्वनिशमितयुतास्सायुधास्सञ्चरन्तु ॥ ३१ ॥

असमसुरतरुकुसुमपरिमळविसरसुरभितवक्षसं ।
भुजगपरिबृढनिचय चणभुजाविजितदितिसुतसंचयम् ।
प्रचुरजलधरनिचयशुचिभररुचिरशुभतरविग्रहं ।
नमतशतमुखममितसुरगणकलितनिजपदपङ्कजं ।
तत्तन्नमतशतमुखमामितसुरगणकलितनिजपदपङ्कजम् ॥

स्रुक्स्रुवभूषितपाणिसरोरुहमद्भुतशक्तिधरं ।
विद्रुमसन्निभदेहमरीचिविभेदकसंतमसं ।
लोकहितार्थमखाहुतिवाहकमव्यधिरूढमिमं ।
नौमि मुखद्वयभासुर सततसुजिह्व समीरसखं ।
तत्तन्नौमि मुखद्वयभासुर सततसुजिह्वसमीरसखम् ॥

प्रणमत शमनं दिनकरतनयं करधृतवरदण्डं ।
त्रिभुवनहरणं पितृगणशरणं प्रकटितमहिमानं ।
नीलपयोधरजालमहोमदमूलधिभेदकदेहरुचिं ।
अगणितविभवं परिगणसहितं कलशजककुभीशं ।
तत्तदगणिताविभवं परिजनसहितं कलशजककुभीशम् ॥

अक्षयपक्षविपक्षबलक्षयदक्षसपक्षयुतं ।
चण्डमखण्डितकुण्डलमण्डलमण्डितगण्डतटं ।
पाणिगबाणकृपाणसतूणसकोणपकोणपतिं ।
चिन्तय सन्ततमन्तरवं तमनन्तगुणं तमिमम् ।
तत्तच्चिन्तय सन्ततमन्तरवं तमनन्तगुणं तमिमम् ॥

विनमत वरुणं विनमत वरुणं करधृतवरपाशं ।
जलनिधिसदनं मकरगमनिशं जलचरकुलराजं ।
नीरदमेचकमञ्जुळदेहमभङ्गदभूषितबाहुयुगं ।
शुभगुणसहितं सुरगणविनुतं तमपरहरिदीशम् ।
तत्तच्छुभगुणसहितं सुरगणविनुतं तमपरहरिदीशम् ॥

सुरपुरतरुवरसुमनःपरिमळसुरभितदिग्वदनः ।
सुरपतिविचकितधरणीधरवरसमवनकृतपवनः ।
महितः प्रहितस्त्वरितस्त्वरितः परितः पुरतः परिचरतात् ।
तत्तन्महितः प्रहितस्त्वरितस्त्वरितः परितः पुरतः परिचरतात्

यक्षगणरक्षणविचक्षणमुदारं शिक्षितविपक्षमतिदक्षपरिवारं ।
त्र्यक्षसखमिक्षु सुसुदक्ष शुभवाचम् ।
यक्षपतिमक्षयुगलक्ष्यमिह कुर्मः ।
तत्तद्यक्षपतिमक्षयुगलक्ष्यमिह कुर्मः ॥

त्रिलोचनं त्रिशूलिनं जटाधरं नशाधिपं
कपर्दिनं विमर्दिनं प्रपञ्चमोहकारणं ।
पुरान्तकं जितान्तकं नतान्तरङ्गतोषकं
चिरन्तनं तपोधनैर्विचिन्त्यमानविग्रहम् ।

उमापतिं नमामि तं कपालिनं कृपालयं
भुजङ्गराजभूषणं कुरङ्गराजपोषणं ।
थलाङ्कितों किणांकितों धिणेकुधिं धिणेकुधिं
धगद्धगद्धिगद्धिगच्छिवस्य ताळमीदृशम् ॥

भोगिभोगशयानधाच्युतनाभिपङ्कजविष्टरं ।
दक्षनारदमुख्यतापससेविताङ्घ्रिसरोरुहम् ।
देवदानवसिद्धमानवसर्गलोलुपमानसं ।
नौमि पद्मजमिन्दिरासखपादपङ्कजसेविनम् ।
तत्तन्नौमि पद्मजमिन्दिरासखपादपङ्कजसेविनम् ॥

मार्ताण्डबिम्बनिभमाणिक्यजालभवदेदीप्यमानसुषमा ।
जालायमानफणजालावृतप्रकटहालाहलोज्ज्वलमुखः ।
निद्राणविष्णुमुखनिश्वासगन्धवहपानातितुन्दिलवपुः ।
भूमीसरोजवरनाळायमानतनुयष्टिर्भुजङ्गरमणः ।
तत्तद्भूमीसरोजवरनाळायमानतनुयष्टिर्भुजङ्गरमणः ॥

धाराकृतिमदधारोल्लसदिभवक्त्राद्यपहृतविघ्नौघं ।
घोराकृतिरिपुवाराहितकरनारायणपरिवारेशं ।
भानामधिपतिभानाद्भुततरभानोल्लसद्धरितपाणिं ।
वन्दे बुधजनवृन्देडितनिजमन्देतरवरसौभाग्यं ।
तत्सद्वन्दे बुधजनवृन्देडितनिजमन्देतरवरसौभाग्यम् ॥

प्रणमत शमनं दिनकरतनयं करधृतवरदण्डं ।
त्रिभुवनहरणं पितृगणशरणं प्रकटितमहिमानं ।
नीलपयोधरजालमहोमदमूलविभेदकदेहरुचिं ।
अगणितविभवं परिगणसहितं कलशजककुभीशं ।
तत्तदगणिताविभवं परिजनसहितं कलशजककुभीशम् ॥

अक्षयपक्षविपक्षबलक्षयदक्षसपक्षयुतं ।
चण्डमखण्डितकुण्डलमण्डलमण्डितगण्डतटं ।
पाणिगबाणकृपाणसतूणसकोणपकोणपतिं ।
चिन्तय सन्ततमन्तरवं तमनन्तगुणं तमिमम् ।
तत्तच्चिन्तय सन्ततमन्तरवं तमनन्तगुणं तमिमम् ॥

विनमत वरुणं विनमत वरुणं करधृतवरपाशं ।
जलनिधिसदनं मकरगमनिशं जलचरकुलराजं ।
नीरदमेचकमञ्जुळदेहमम‌ङ्गदभूषितबाहुयुगं ।
शुभगुणसहितं सुरगणविनुतं तमपरहरिदीशम् ।
तत्तच्छुभगुणसहितं सुरगणविनुतं तमपरहरिदीशम् ॥

सुरपुरतरुवरसुमनःपरिमळसुरभितदिग्वदनः ।
सुरपतिविचकितधरणीधरवरसमवनकृत्पवनः ।
महितः प्रहितस्त्वरितस्त्वरितः परितः पुरतः परिचरतात् ।
तत्तन्महितः प्रहितस्त्वरितस्त्वरितः परितः पुरतः परिचरतात् ॥

यक्षगणरक्षणविचक्षणमुदारं शिक्षितविपक्षमतिदक्षपरिवारं ।
त्र्यक्षसखमिक्षु सुसुदक्ष शुभवाचम् ।
यक्षपतिमक्षयुगलक्ष्यमिह कुर्मः ।
तत्तद्यक्षपतिमक्षयुगलक्ष्यमिह कुर्मः ॥

त्रिलोचनं त्रिशूलिनं जटाधरं नटाधिपं
कपर्दिनं विमर्दिनं प्रपञ्चमोहकारणं ।
पुरान्तकं जितान्तकं नतान्तरङ्गतोषकं
चिरन्तनं तपोधनैर्विचिन्त्यमानविग्रहम् ।

उमापतिं नमामि तं कपालिनं कृपालयं
भुजङ्गराजभूषणं कुरङ्गराजपोषणं ।
थलाङ्कितों किणांकितों धिणेकुधिं धिणेकुधिं
धगद्धगद्धिगद्धिगच्छिवस्य ताळमीदृशम् ॥

भोगिभोगशयानधाच्युतनाभिपङ्कजविष्टरं ।
दक्षनारदमुख्यतापससेवितांघ्रिसरोरुहम् ।
देवदानवसिद्धमानवसर्गलोलुपमानसं ।
नौमि पद्मजमिन्दिरासखपादपङ्कजसेविनम् ।
तत्तन्नौमि पद्मजमिन्दिरासखपादपङ्कजसेविनम् ॥

मार्ताण्डबिम्बनिभमाणिक्यजालभवदेदीप्यमानसुषमा ।
जालायमानफणजालावृतप्रकटहालाहलोज्ज्वलमुखः ।
निद्राणविष्णुमुखनिश्वासगन्धवहपानातितुन्दिलवपुः ।
भूसीसरोजवरनाळायमानतनुयष्टिर्भुजङ्गरमणः ।
तत्तद्भूसीसरोजवरनाळायमानतनुयष्टिर्भुजङ्गरमणः ॥


धाराकृतिमदधारोल्लसदिभवक्त्राद्यपहृतविघ्नौघं ।
घोराकृतिरिपुवाराहितकरनारायणपरिचारेशं ।
भानामधिपतिभानाद्भुततरभानोल्लसद्धरित्पाणिं ।
वन्दे बुधजनवृन्देडितनिजमन्देतरवरसौभाग्यं ।
तत्तद्वन्दे बुधजनवृन्देडितनिजमन्देतरवरसौभाग्यम् ॥

मळिकुलालकपटलकोमळ अनिलसदृशगतिं ।
भ्रुकुटिभूषणतरळतारककुटिलनयनयुगं ।
भजत कांचनखचितरत्नकरुचिरमकुटधरं ।
विहगवल्लभमहिविभूषणासुरविमथरथम् ।
तस्माद्विहगवल्लभमहिविभूषणासुरविमथरथम् ॥

सरसिजभवभववशतमखदहनाः पितृपतिनिरृकृतिजलपतिपवनाः ।
शिवसखशिवमुखसुरपतिजगणा दिवि भुवि ये ते सकलास्सगणाः ।
हरिवरयागे भुविकृतभोगे विदधत विदधत सान्निध्यम् ।
तत्तद्धरिवरयागे भुविकृतभोगे विदधत विदधत सान्निध्यम् ॥

स्वस्ति प्रजाभ्यः परिपालयन्तां न्याय्येन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यश्शुभमस्तु नित्यं लोकास्समस्तास्सुखिनो भवन्तु ॥





कल्याणमहोत्सवः

देवं प्राङ्मुखमुपवेश्य श्रीभूमीभ्यां उदगासने आसित्वा, पूर्वोक्तैवंगुणविशेषणविशिष्टायामस्यां शुभतिथौ साङ्ख्येन कर्मणा श्री श्रीनिवासस्वामिनः श्रीभूमीभ्यां सहोद्वाहयिष्य इति सङ्कल्प्य, आदौ विष्वक्सेनं संपूज्य, तत्पूर्वेद्युः कौतुकं बध्वा पुण्याहं वाचयित्वा, अग्निं प्रतिष्ठाप्य अग्निं प्रज्वाल्य ॥ क्रमेणाघारहोमादीन्कुर्याद्विध्युक्तवर्त्मना । समिधं च नृसूक्तेन जुहुयात्षोडशाहुतीः ॥ चरुणा विष्णुगायत्र्या चतुर्विंशाहुतीर्भवेत् । श्रीसूक्तेन घृतं हुत्वा भूम्यां च युगपद्यदि । सायाह्ने स्वस्तिसूक्तेन सह देव्योः परस्परम् ॥ पुष्पमाल्यं कण्ठे प्रसाद्य, देवीभ्यां देवं त्रिवारं प्रदक्षिणीकृत्य देवदेव्योः डोलारोपणं कृत्वा ततो विवाहमण्टपमारोप्य देवं सिंहासने प्राङ्मुखं उपवेश्य देव्यौ उदङ्मुखमुपवेश्य पवित्रपाणिराचार्योदङ्मुख उपविश्य पूर्वोक्त एवंगुणेत्यादिसांख्येन कर्मणा अस्य देवदेवस्य मधुपर्केण संपूजयामीति संकल्प्य, दधिक्षौद्रसर्पिसहितं मधुपर्कं निवेद्य, तिथ्यादीनुच्चार्य अस्य भगवतः देवदेवस्य श्रीभूम्यौ उद्वाहयिष्य इति संकल्प्य ॥

अथ कन्यावरणम् ॥ भार्गव च्यवन आप्नुवान और्व जामदग्नि पञ्चार्षेय प्रवरान्वितश्रीवत्सगोत्रोद्भवाय वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धात्मकाय श्रीश्रीनिवासाख्यशर्मणे वराय लक्ष्मीं वृणीमहे। वृणीध्वमिति प्रतिवचनम् ॥

आत्रेयार्चनानसश्यावाश्व त्रयार्षेयप्रवरान्वित आत्रेयगोत्रोद्भवां वराहोद्धृतां क्षीरसागरोत्पन्नां लक्ष्मीं वृणीध्वं, वृणीमहे । एवं त्रिवारमुक्त्वा स्वस्तिवाचनं कृत्वा मुहूर्तं वाचयित्वा, महासङ्कल्पं कृत्वा देवस्य पादौ क्षीरेण प्रक्षाळय, सुवर्णाक्षतोदकं गृहीत्वा, आत्रेयार्चनानसश्यावाश्व त्रयार्षेय प्रवरान्वित आत्रेयगोत्रोद्भवां वराहोद्धृतां विश्वम्भरामिमां देवीं श्रीवत्सगोत्राय श्री श्रीनिवासाख्यपरब्रह्मणे दास्यामि ।

अथ दानमन्त्रम् ॥ लक्ष्मीं क्षीराब्धितनयां मानिनीं जनकात्मजाम् । दास्यामि लोकनाथाय आरविन्दालयामिमाम् ॥ विश्वम्भरां वसुमतीं बलां सर्वसहामिमाम् । अप्रमेयाय दास्यामि भूमीं भद्रगुणान्विताम् ॥ इति हिरण्याक्षतोदकं गृहीत्वा देवस्यत्वेति मन्त्रेण लक्ष्मीं प्रतिगृह्णामि । देवीं प्रतिगृह्णन्तु । उद्वाहस्सुमुहूर्तोऽस्त्वित्यनुगृह्णन्तु । सुमुहूर्तमस्त्वित्यन्यैः प्रतिवचनम् । माङ्गल्यसूत्रं देव्योः कण्ठे बध्वा । माङ्गल्यं तन्तुनानेन जगज्जननहेतुना । बध्नामि सुभगे कण्ठे भक्तानां मङ्गळं कुरु ॥ देवीभ्यां सह देवं मन्दिरं नीत्वा वैवाहिकस्थाने उत्तराभिमुखे गुरुः उल्लेखनादिदामोदरान्तं हुत्वा, पूर्वं श्रियै, ततो भूम्यै पर्यायेण क्रियां नयेत् । समिधो मूलमन्त्रेण जुहुयाच्छोडशाहुतीः । चरुणा विष्णुगायत्र्या चतुर्विंशत्याहुतिर्भवेत् ॥ घृतं पुरुषसूक्तेन भूमिसूक्तेन वा पुनः ॥ लाजाहोमं च कृत्वा, अग्निं पञ्चवारं प्रदक्षिणीकृत्य पञ्चोपनिषदः प्रायश्चित्ताहुतीर्हुत्वा पूर्णाहुत्यन्तमखिलं कृत्वा, विप्रांश्च तोषयेत् । वृतारोपणमाचरेत् । घृतदूर्वाङ्कुरं शालितण्डुलं

व पात्रे निधाय कराभ्यां पात्रमादाय देवदेव्योश्चाङ्केषु निक्षिपेत् । मङ्गळं ततः । सुशोभनमिति घृतं देवस्य पादयोः । सुशोभनमिति कट्यां । सुभद्रमिति मूर्ध्नि सुमङ्गलमिति सिञ्चेत् । दूर्वादिसकलं मूर्ध्नि क्षिपेत् । देवीं देवेन सह योजयित्वा अर्घ्यादिदीपान्तमर्चयित्वा नीराजनेक्षुपिण्डिकान्दर्शयित्वा अन्यत्सर्वं लौकिकवर्त्मना कुर्यात् । श्रीभूमिसहितं देवं ग्रामप्रदक्षिणं कृत्वा, देवीभ्यां सह देवं मण्टपे समारोप्य राजवदुपचर्य महाहविर्निवेद्य ब्राह्मणान्भोजयित्वा आशिषो वाचयित्वा, एवं सायंप्रातः प्रतिदिनं होमं कुर्यात् । समिदाज्यचरुप्रायै-रष्टोत्तरशताहुतीः । जुहुयान्मूलमन्त्राभ्यां पञ्चोपनिषदैरपि ॥ पूर्णाहुतीः हुत्वा मन्त्रशेषं समाप्य, आचार्यः दक्षिणां दद्यात् । प्रथमे दिने श्रीभूमिसहितं देवं तैलाभ्यञ्जनेन विवाहदिवसवत् स्नापयेत् ।

॥ इति कल्याणमहोत्सवः ॥



महासङ्कल्पः

अस्य श्रीमदादिनारायणस्य ज्ञानशक्त्याद्यनन्तकल्याणगुणगणैकतानस्य आद्यश्रीभगवतो महापुरुषस्य महाजलौघमध्ये परिभ्रमायमाणानां अनेककोटिब्रह्माण्डानामेकतमेऽव्यक्तमहदहङ्कारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृते अस्मिन्महति ब्रह्माण्डकटाहकरण्डे सकलादीष्ट्रयादिवराहदंष्ट्राङ्कुरमृणाळभूतस्य जगन्मूलकन्दभगवदाधारशक्तिप्रकृतिकूर्माद्यष्टदिग्गजानन्तफणामण्डलस्योपरि प्रतिष्ठितस्य अतळवितळसुतळतळातळरसातळमहातळपाताळाख्यलोकसप्तकस्य उपरितले वर्तमानस्य भूर्भुवस्सुवर्महज्जनस्तपस्सत्यलोकस्याधोभागे संस्थितस्य बाह्ये अन्धतमसाऽवृते अनन्तसूर्यकिरणतेजसा प्रकाशितेन लोकालोकाचलेन वलयितस्य जम्बूप्लक्षकुशक्रौञ्चशाकशाल्मलिपुष्कराख्यसप्तद्वीपैः परिमण्डितस्य लवणेक्षुसुरासर्पिर्दधिक्षीरशुद्धोदकाख्यसप्तार्णवैः परिवृतस्य भारतकिंपुरुषहिरण्मयोत्तरकुरुहरिरम्यकभद्राश्वकेतुमालेळावृताख्यनववर्षैः परिमण्डितस्य इन्द्रकशेरुताम्रगभस्तिनागगन्धर्वचारणसिंहळरंभाख्यनवखंडैः परिवृतस्य चैत्ररथगन्धमादनवैभ्राजनंदनाख्यदिव्योद्यानैः परिशोभितस्य अरुणोदयमहाभद्रसीतोदकमानसाख्यदिव्यसरोवरैः विराजितस्य गङ्गायमुनासरस्वतीनर्मदाकृष्णवेणीसरयूतुङ्गभद्रागोदावरीकावेर्याख्यपुण्यनदीभिः परिशोभितस्य भूमण्डलस्योपरि भूर्भुवस्सुवर्महज्जनस्तपस्सत्यलोकानामुपरि ब्रह्माण्डकटाहस्योपरिभागे आवर्णजबहिर्महान्धकारस्योपरिस्थिते अनेककोटिवह्न्यर्केन्दुदिव्यविमाने श्रीमद्वैकुण्ठाख्ये दिव्यरत्नमयानन्दमण्टपे भगवदाधारशक्तिप्रकृतिकूर्मानन्तधर्माद्यष्टमूर्तिधारितोपरि सहस्रदळपरिमितमहापद्मस्य पूर्वा-



यदुशैलस्थित श्री योग नृसिंहः.

दीशानान्ताष्टदळेषु विमलाद्यष्टभिः परिवृतः तत्कर्णिकोपरि सात्त्विकादित्रयान्विते तदुपरि अग्निमण्डलादिमण्डलत्रये तदुपरि ऋग्यजुस्सामाथर्वाङ्गिरसान्विते अनेककोटिसूर्यप्रकाशदिव्यसिंहासनस्योपरि प्रतिष्ठितस्य अपरिमिततेजोराशिभिः अखिलजगन्मातृश्रीभूनीळाभिः परिसेव्यमानस्य तद्बहिः प्राच्यादीशानपर्यन्तं वासुदेवादिमूर्तिभिः तेषां शक्तिभिः परिसेव्यमानस्य तद्बहिः आदिवराहाद्यष्टविद्येश्वरैः परिसेव्यमानस्य तद्बहिस्सुदर्शनादिदिव्यायुधधारिभिः परिसेव्यमानस्य तद्बहिरनन्तगरुडविष्वक्सेनादिनित्यैः परिसेव्यमानस्य तद्बहिर्द्वाराध्यक्षैः चण्डादिद्वारपालैः परिसेव्यमानस्य तद्बहिरिन्द्राद्यष्टलोकपालैः परिसेव्यमानस्य तद्बहिः कुमुदाद्यष्टपार्षदेश्वरैः परिसेव्यमानस्य तद्बहिः परितः पञ्चकालपरायणैः भगवच्छेषकर्मनिष्ठैः सालोक्यादिपदस्थितैः नित्यतृप्तैः परिसेव्यमानस्य अखिलजगत्सृष्टिस्थितिसंहारकारणकर्तृभूतस्य भगवतो वासुदेवस्य अव्याहतदिव्याज्ञया प्रवर्तमानस्य आद्यब्रह्मणः द्वितीयपरार्धे . . . . इत्यादितिथ्यादीनुच्चार्य, देवदेवोत्तमस्य श्रीनिवासस्वामिनः लक्ष्मीं नाम्नीं लोकमातरं लोकसंरक्षणार्थं उद्वाहं करिष्ये ।

इति महासङ्कल्पः ॥

रथप्रतिष्ठा

रथप्रतिष्ठा । विष्णुतन्त्रे । श्रीभगवानुवाच । रथस्य स्थापनं वक्ष्ये समासाच्छृणु सुव्रत । रथस्य शिबिकायाश्च गजस्य तुरगस्य च ॥ स्थापनं समुदायेन वक्ष्यामि कमलोद्भव । उत्तरायणकाले तु दक्षिणायनकेऽपि वा ॥ प्रशस्तपक्षे नक्षत्रे सुमुहूर्ते सुलग्नके । रथसंपन्नकाले तु संस्थापनमथाचरेत् ॥ तक्षकं हेमवस्त्राद्यैः पूजयित्वा विसर्जयेत् । पञ्चगव्यैश्च संप्रोक्ष्य पवमानमुदीरयन् ॥ पुण्याहं वाचयित्वा तु तज्जलैः प्रोक्षयेद्रथम् । अङ्गप्रत्यङ्गसंयुक्तं रथं सङ्ग्राह्य देशिकः ॥ पश्चात्संप्रोक्षणं कर्म कारयेद्विधिचोदितम् । रथं संस्कार-संयुक्तं सर्वकामफलप्रदम् ॥ तस्मात्सर्वप्रयत्नेन संप्रोक्षणमथाचरेत् । प्रथमं चाङ्कुरं प्रोक्तं द्वितीयं जलवासनम् ॥ अक्षिमोक्षं तृतीयं च चतुर्थं स्नपनं तथा । पञ्चमं चाधिवासस्तु षष्ठं चैवाग्निपूजनम् ॥ शान्तिहोमस्सप्तमं च पूर्णाहुतिरथाष्टमम् । स्थापनं नवमं विद्याद्दशमं न्यास उच्यते ॥ दक्षिणां च ततः पश्चाद्द्वादशं चाधिरोहणम् । एवमेव प्रकारेण रथप्रोक्षणमाचरेत् ॥ प्रोक्षणस्य दिनात्पूर्वं सप्तमे पञ्चमे दिने । तृतीये दिवसे वापि अङ्कुरार्पणमाचरेत् ॥ द्वितीयदिवसे ब्रह्मन् कारयेद्देशिकोत्तमः । सर्वोपकरणैस्सार्धं रथपार्श्वं समाश्रयेत् ॥ रथस्य पूर्वभागे तु चतुस्तम्भसमन्वितम् । तोरणध्वजसंयुक्तं प्रपां तत्र प्रकल्पयेत् ॥ दशभारप्रमाणेन शालिपीठं प्रकल्पयेत् । तदर्धं तण्डुलं चैव तदर्धं तिलमेव च ॥ उपर्युपरि संस्तीर्य पीठं कुर्याद्विचक्षणः । तस्योपरि कटाहं तु विन्यसेत्तोयपूरितम् ॥ दर्पणं ब्रह्मकूर्चं च सुगन्धं तत्र निक्षिपेत् । कटाहस्यैव परितः अष्टकुम्भान्प्रकल्पयेत् ॥ हेमरत्न-समायुक्तान् पृथग्वस्त्रेण वेष्टितान् । अष्टकुम्भेषु विप्रेन्द्राष्टविद्येश्वरान् न्यसेत् ॥ वराहो नारसिंहश्च श्रीधरो हयशीर्षकः । जामदग्निश्च

मार्कण्डेये रथलक्षणम्

रथलक्षणं मार्कण्डेये । रथं च त्रिविधं प्रोक्तं वृत्तं च चतुरश्रकम् । अष्टाश्रं च प्रकर्तव्यं त्रिविधं रथमुत्तमम् ॥ अष्टाश्रं वोत्तमं प्रोक्तं चतुरश्रं तु मध्यमम् । अधमं वृत्तमाख्यातं कारयेत्तु विमानवत् ॥ पादादिस्थूपपर्यन्तं कृत्वा प्रासादरूपवत् । शिल्पिना कुशलेनैव रथसङ्ग्रहणं कुरु ॥ प्रासादोच्छ्रायमायामं पादहीनमथापि वा । प्रासादार्धं तु वा विप्र कर्तव्यं त्रिविधं भवेत् ॥ कुर्यात्सोपानमार्गेण पर्यायेणैव कल्पयेत् । आयामं च प्रविस्तारं कल्पयित्वा द्विजोत्तम ॥ नवचक्रं सप्तचक्रं पञ्चचक्रमथापि वा । पट्टिकैर्बहुभिर्युक्तं स्तम्भैर्नानाविधैरपि ॥ शिरोभिः पञ्चभिर्युक्तं नानालङ्कारसंयुतम् । चतुर्दिक्षु चतुर्द्वारं कल्पयेन्मुनिपुङ्गव ॥ वस्त्रालङ्कारसंयुक्तं रज्जुभिः बन्धयेद्दृढम् । पुष्पमाल्यैरलंकृत्य फलैर्नानाविधैरपि ॥ ध्वजछत्रपताकादिचामरैश्चैव रञ्जयेत् । घण्टामालासहस्रैश्च सुवर्णकलशैरपि ॥ हस्त्यश्वरथपादादीन् पट्टिकासु प्रकल्पयेत् । एवं कृत्वा विधानेन कल्पयेद्रथमुत्तमम् ॥ अनुक्तानां तु सर्वेषां शेषयुक्तं प्रकल्पयेत् । इति संक्षेपतः प्रोक्तं रथलक्षणमुत्तमम् ॥ रथं प्रासादरूपं स्यादिति तन्त्रेषु कीर्तितम् । रथाङ्गं पादमित्युक्तं पट्टिका मेखला स्मृता ॥ उदरं रथमध्यं स्याच्चतुष्कूटं चतुर्भुजम् । सौवर्णं कलशस्यान्तं शिरःस्थानं प्रकीर्तितम् ॥ एवं प्रासादरूपं स्यात्प्रवदन्ति मनीषिणः ॥

रामश्च वामनो वासुदेवजः ॥ एते विद्येश्वराः प्रोक्ताः क्रमात्कुम्भेषु पूजयेत् । एवं क्रमेण परितः कुम्भेषु च समाह्वयेत् ॥ कटाहे चिन्तयेद्विद्वान् क्षीरार्णवमनुत्तमम् । वेदाध्ययनघोषैश्च रथच्छायां निवेशयेत् ॥ पुण्याहोक्तपुरस्कं तु नवकैः स्थापयेद्रथम् । रथं च पुरुषाकारं चिन्तयेद्देशिकोत्तमः ॥ पादौ तु पादचक्रं तु जानुदेशं तु कीलकम् । ऊरू चैव तलं प्रोक्तं वितलं कटिदेशकम् ॥ त्रितलं नाभिदेशं तु चतुर्थं चोदरं तथा । पञ्चमं हृदयस्थानं स्तम्भाद्यादिकं तथा ॥ लोहस्थानभुजश्चैव कण्ठदेशं तु कन्धरम् । शेषास्तु मुखमित्युक्तं शिरस्थानं तु पञ्चकम् ॥ कलशं मौळिरित्युक्तं महाङ्गं स्यन्दनस्य तु । उपाङ्गमधुना वक्ष्ये समाहितमनाश्शृणु ॥ नासां च सिंहभद्रं च श्रोत्रे चैव ध्वजं तथा । शालाश्च चक्षुरित्युक्तं रेखा स्याद्रोमकूपकम् ॥ अपानं सुशिरंचैव गुह्यस्थानं तु सन्धिषु । आयसं चास्थिरित्युक्तं ताम्रं मांसं च बुद्धिमान् ॥ रुधिरं वर्णमित्युक्तं जीवस्स्याद्विहगेश्वर । रथं च गरुडं ध्यात्वा तत्त्वादीन्युपसंहरेत् ॥ पृथिवीमप्सु संहृत्य अपो अग्नौ विलुप्य च । संहृत्य वायुना वह्निं वायुमाकाशतां नयेत् ॥ आकाशाद्याधिदैवत्यं करणैर्विषयैस्सह । कुशैश्च नववस्त्रैश्च छादयेत् स्यन्दनं वरम् ॥ युवासुवासा इति च वस्त्रैराच्छादयेत्ततः । उदुत्य-मिति च प्रोच्य दर्भमालां च वेष्टयेत् ॥ स्थापिते कूर्परादेशे रथच्छायां निवेशयेत् । ऋतं चेति च जप्त्वाऽथ रथच्छायां निमज्जयेत् ॥ चक्रमन्त्रेण मतिमान् रक्षां कुर्यात्तु सर्वतः । कूर्परस्य च वामे तु ब्रह्मकुम्भं समर्चयेत् ॥ धान्यराशौ विनिक्षिप्य नववस्त्रेण वेष्टयेत् । गरुडप्रतिमां तत्र कारयेन्निष्कमात्रतः ॥ तस्मिन्मध्ये यजेद्देवं गरुडं सर्पभूषणम् । नैवेद्यान्तं समभ्यर्च्य पश्चाद्धोमं समाचरेत् ॥ प्रपामध्ये च मतिमान् कुण्डे वा स्थण्डिलेऽपि वा । समिधाज्यचरुं चैव प्रत्येकं शतमाहुतीः ॥ गरुडपञ्चाक्षरेणैव जुहुयाद्देशिकोत्तमः । पञ्चपञ्चाहुती-श्चैव पञ्चोपनिषदैः क्रमात् ॥ संपाताज्यं तु संगृह्य गरुडगायत्रविद्यया ।

रथाङ्गानि च सर्वाणि संस्पृशेद्देशिकोत्तमः ॥ स्यन्दनं चैव परितः बलिदानं समाचरेत् । प्रार्थयेद्देवदेवेशं रात्रिशेषं समापयेत् ॥ प्रभाते च समुत्थाय कृतस्नानः कृताह्निकः । आचार्योऽनुचरैस्सार्धं रथपार्श्वं समाश्रयेत् ॥ रथस्थितानां देवानां प्रणमेद्दण्डवत्क्षितौ । रथवस्त्रं व्यपोह्याथ वीक्षयेद्गरुडविद्यया ॥ स्यन्दनस्थितदेवानामक्षिमोक्षण-माचरेत् । मध्वाज्यपात्रे संगृह्य धान्यराशौ विनिक्षिपेत् ॥ मधुवातेति मन्त्रेण मधुपात्रं समर्चयेत् । घृतस्नातेति मन्त्रेण घृतपात्रं समर्चयेत् ॥ तच्चक्षुरिति वामाक्षौ चित्रं देवेति दक्षिणे । मधुना स्वर्णसूच्या च नयनोन्मीलनं चरेत् ॥ घृतपात्रं च गां कन्यां दीपहस्तां सुमङ्गलीम् । सर्ववाद्यसमायुक्तं दर्शयेत्स्यन्दनाय च ॥ ब्रह्मकुम्भस्थतोयेन प्रोक्षयेत् स्यन्दनं वरम् । गन्धपुष्पैस्समभ्यर्च्य पृथुकादीन्निवेदयेत् ॥ रथं संस्नापयेद्विद्वान् नवैस्सप्तदशैर्घटैः । रथं गरुडवद्ध्यात्वा अधिवासन-मारभेत् ॥ रथस्य नेमिमूलेषु शालिभाराष्टकैर्युतम् । तदर्धं तण्डुलं चैव तदर्धं तिलमेव च ॥ पृथग्वस्त्रेण संछाद्य अधिवासनमारभेत् । रथस्य सृष्टिन्यासं च गरुडपञ्चाक्षरेण तु ॥ रथस्य दक्षिणे भागे मण्टपं कारयेच्छुभम् । षोडशस्तम्भसंयुक्तं चतुर्द्वारसमन्वितम् ॥ तोरणध्वजसंयुक्तं अष्टमङ्गलशोभितम् । पञ्चहस्तप्रमाणेन वेदिकां मध्यमे न्यसेत् ॥ द्वितालमुन्नतं कुर्याद्दर्पणोदरसंनिभम् । नवभार-प्रमाणेन वेदीमध्ये तु विन्यसेत् ॥ तदर्धं तण्डुलं चैव तदर्धं तिलमेव च । पृथग्वस्त्रेण संछाद्य उपर्युपरि विन्यसेत् ॥ तस्य मध्ये महाकुम्भं करकास्त्रसमन्वितम् । कल्पयेद्देशिकेन्द्रेण सूत्रवस्त्रैस्सम-न्वितम् ॥ गरुडप्रतिमां तत्र निक्षिपेद्धेमनिर्मितम् । दिव्यायुधानां प्रतिमां करकास्त्रे विनिक्षिपेत् ॥ अष्टविद्येश्वरान्कुम्भान् पूर्ववद्विन्यसेत् क्रमात् । स्यन्दनस्थितमूर्तीनां पृथक्कुम्भान्प्रकल्पयेत् ॥ रथस्य शिबि-कायाश्च गजस्य तुरगस्य च । वाहनादिषु सर्वेषु गरुडाच्छक्तिमाह्वयेत् । स्थावरं जङ्गमं चैव द्विविधा च प्रकीर्तिता । स्थावरं गरुडं विद्यात्

जङ्गमस्सर्ववाहनम् ॥ विघ्नेश्वराणां सर्वेषां शक्तिमूलात्समाह्वयेत् । गरुडं मूलमन्त्रेण आवाह्य घटमध्यमे ॥ गरुडमुद्रां प्रदर्श्याथ चक्रमुद्रां प्रदर्शयेत् । कुम्भपात्रं स्पृशन् जप्त्वा अष्टोत्तरशतं मनुम् ॥ अर्चयेत् गारुडैर्मन्त्रैस्तथा गायत्र्या पुनः । सुपर्णोसीति तदनु जपेत्स्वस्ति नः इत्यपि ॥ वेदिकानां चतुर्दिक्षु कुण्डानि परिकल्पयेत् । चतुरश्रं धनुर्वृत्तं पद्मं पूर्वादिषु क्रमात् ॥ कुण्डे वा स्थण्डिले वापि अग्नेरायतनं भवेत् । सुपर्णं पूर्वदिग्भागे गरुडं दक्षिणे तथा ॥ पश्चिमे वैनतेयं तु तार्क्ष्यं चैवोत्तरे तथा । ब्रह्मकोशं पुरस्कृत्य नमो भगवते पदम् ॥ तत्तन्नाम चतुर्थ्यन्तं स्वाहान्ते च हुनेत्क्रमात् । तत्तन्मन्त्रेण जुहुयात्समिधाज्यचरून्क्रमात् ॥ अष्टोत्तरसहस्रं तु अष्टोत्तरशतं तु वा । होमावसाने विप्रेन्द्र संपाताज्यं तु सङ्ग्रहेत् ॥ पालाशं पूर्वदिग्भागे खादिरं दक्षिणे तथा । पश्चिमे बिल्वकाष्ठं च औदुम्बरमथोत्तरे ॥ शुद्धान्नं पूर्वदिग्भागे मुद्गान्नं दक्षिणे तथा । पायसं पश्चिमे कुण्डे गुडान्नं चोत्तरे तथा ॥ स्यन्दनस्थितदेवानां तन्मन्त्रेणैव होमयेत् । संगृहीतैश्च संपातैः रथस्याङ्गानि संस्पृशेत् ॥ पश्चादध्ययनं कुर्याद्विहगेन्द्रस्य तुष्टये । पूर्वे देवव्रतं सायं बृहत्सामं तु दक्षिणे ॥ यज्ञायज्ञमिति पठेत् यज्ञागारस्य पश्चिमे । रथन्तरं चोत्तरे तु वैष्णवैस्सह देशिकः ॥ यावत्सामसमाप्तिश्च तावत्कालं स्पृशेद्रथं । स्तोत्रैश्च विविधैर्नृत्तै रात्रिशेषं समापयेत् ॥ प्रभाते च समुत्थाय नित्यकर्म समाप्य च । देवपार्श्वं समाश्रित्य देवदेवं प्रपूजयेत् ॥ देवालयाद्विनिष्क्रम्य रथपार्श्वं समाश्रयेत् । अंगप्रत्यंग संयुक्तं स्यन्दनं वीक्ष्य देशिकः ॥ गतागतं ततो ज्ञात्वा स्थिरत्वं चाथ शिल्पिना । तदङ्गानि पुनश्शोध्य स्थपती स्थापकाज्ञया ॥ यागगेहं प्रविश्याथ अर्चयेत्सर्वदेवताः । होमं तु पूर्ववत्कृत्वा बलिं कृत्वा तु पूर्ववत् ॥ रथस्याङ्गानि सर्वाणि शोधयेदम्भसा पुनः । मूलमंत्रेण विप्रेन्द्र स्यन्दनं प्रोक्ष्य संस्पृशेत् ॥ रथदेवान् समावाह्य

रथस्याङ्के तु यत्नतः। चक्रदण्डे तु माया च चक्रेषु शशिभास्करौ॥ आधारशक्तिमाराध्य धाराख्ये दण्डकाद्वये। वेदरूपधरो देवो मध्यदण्डाधिदेवता॥ परितः पट्टिकाजाले दशमूर्त्याधिदेवता। गात्रेषु गात्रबन्धेषु वेदात्मा विहगेश्वरः॥ गात्रगात्रान्तरे वायुः सत्त्वादि गुणसंयुतः। रथप्रासादके चोक्ते स्थूपिकायां सदा हरिः॥ वाराहो नारसिंहश्च श्रीधरो हयशीर्षकः। पूर्वादिषु चतुर्दिक्षु न्यस्तव्यास्तत्र यत्नतः॥ चतुर्वेदमयास्त्वेषु वरुणोऽग्निस्तथानिलः। जातव्याग्निः क्रमेणैव तन्मुखे जठराग्निके॥ युगेषु गात्रे स्मर्तव्यं वेदात्मा विहगाधिपं। ब्रह्मं सारथ्यरूपेण कल्पयेद्दारुकेऽथ वा॥ रथप्रागादिकाशासु लोकपालान् प्रकल्पयेत्। रथस्य द्वारयोश्चैव जयं च विजयं तथा॥ एवं संकल्प्य देवांश्च रथं संपूजयेत्क्रमात्। अहश्शेषं समाप्याथ तत्र होमं समाचरेत्॥ रथस्य च चतुर्दिक्षु शान्तिहोमं प्रकल्पयेत्। कुण्डे वा स्थण्डिले वापि अग्नेरायतनं भवेत्॥ पालाशं खादिरं चैव बिल्वमौदुंबरं तथा। मधुक्षीराज्यसंयुक्तं तथाभ्युक्ष्य समिद्गणान्॥ समिधो मूलमन्त्रेण तार्क्ष्यं पञ्चाक्षरेण तु। आज्यं च गारुडैर्मन्त्रैश्चरुं तेनैव होमयेत्॥ रथस्य परितः कुर्याद्बलिदानं विशेषतः। वेदघोषैश्च नृत्तैश्च रात्रिशेषं समापयेत्॥ प्रभाते च समुत्थाय कृतस्नानः कृताह्निकः। यागमंटपमाविश्य साम्ना देवव्रतेन तु॥ द्वारयागपुरस्कं तु पूर्ववत्पूजयेत्क्रमात्। होमं तु पूर्ववत्कृत्वा प्रायश्चित्ताहुतीं ततः॥ पञ्चोपनिषदैर्मन्त्रैराज्येनाष्टोत्तरं शतं। पश्चिमे वृत्तकुण्डे च पूर्णाहुतिमथाचरेत्॥ अग्निकुण्डगतान् देवान् महाकुम्भे समाह्वयेत्। तोरणादिस्थितान् देवान् विसृज्य तदनन्तरं॥ महाकुंभं समादाय विन्यसेच्छिष्य मूर्धनि। करकास्त्रं समादाय सेचयेदस्त्रमन्त्रतः॥ अष्टविद्येश्वरान् कुम्भान् वहेयुर्वेदपारगाः। स्वस्तिसूक्तसमायुक्तं छत्रचामरसंयुतम्॥ राजोपकरणैस्साधं कृत्वा ग्रामप्रदक्षिणम्। रथपार्श्वे समासाद्य पुरतः

स्थापयेद्धटान् ॥ पुण्याहं वाचयित्वाथ सकल्पविधिपूर्वकम् । बृहस्पतिं समाहूय वाचयेल्लग्नमुत्तमम् ॥ प्रतिष्ठासीति साम्ना तु ध्रुवाद्या इति मन्त्रतः । महाकुम्भस्थतोयेन प्रोक्षयेत्स्यन्दनं शुभम् ॥ रथं गरुडवद्ध्यात्वा न्यासकर्म समाचरेत् । रथस्थितानां देवानां तत्तन्मन्त्रेण कारयेत् ॥ महाहविस्ततो दद्यादाचार्यं पूजयेत्क्रमात् । वस्त्राभरणमाल्यैश्च सुमहद्भिर्धनैरपि । इति संक्षेपतः प्रोक्तं रथस्य स्थापनं विभोः ॥

॥ इति रथप्रतिष्ठाविधिः ॥



॥ श्रीः ॥

मण्डलरचनाक्रमः

अथाचार्यः मण्डलवेदिकां पुण्याहजलेन प्रोक्ष्य प्राणायामपूर्वकं तस्यां चन्दनार्द्राणि सूत्राणि प्रागायतानि सप्तदश तावन्त्युदगायतानि च निपात्य तेषु षट्पञ्चाशदुत्तरद्विशतपदेषु मध्ये षट्त्रिंशत्कोष्ठानि संमृज्य, मध्ये शङ्कुं संस्थाप्य वृत्तानि समानि पञ्चबिम्बानि यथा स्युस्तथा भ्रामयित्वा, तेषु प्रथमं बिम्बं कर्णिकाक्षेत्रं द्वितीयं त्रेधा विभज्य, तथाकृतेषु प्रथमं केसरान्तवलयं द्वितीयं दळान्तवलयं तृतीयं नाभिमण्डलं तन्नाभिमण्डलमपि त्रेधा विभज्य तद्बहिश्शिष्टेषु बिम्बेषु अरक्षेत्रं द्वाभ्यां तद्बहिरेकेन नेमिमण्डलं च कल्पयित्वा, तद्बहिरष्टाविंशतिपदैः पीठिकां तद्बहिः पङ्क्तिद्वयेनाशीतिपदैर्वीथिकां च कल्पयेत् । तद्बहिः पङ्क्तिद्वितीयेन द्वादशाधिकपदैर्द्वयोः पङ्क्त्योः चतुरश्रं कृत्वा तन्मध्ये पूर्वाद्युत्तरान्तं चतुश्चतुःपदैश्चतुर्द्वाराणि आग्नेयादिषु कोणेष्वपि तथैव च कृत्वा द्वारपार्श्वयोः बाह्यरथ्यायां द्वे द्वे अवान्तररथ्यायामेकैकं च परिमार्जयेत् । एवं चेदर्धशोभा भवन्ति अर्धशोभयोर्मध्ये बहिःपङ्क्तावेकैकयान्तरपङ्क्तौ त्रीणि चैवं चतुर्भिः पदैः शोभा भवन्ति । एवं चतृषु दिक्षु शोभानामष्टकमर्धशोभानां षोडशं च कृत्वा ततो वर्णकलापपरिपूर्णं कुर्यात् । पञ्चरत्नैर्धातुभिर्वा तेषां चूर्णैर्वा पञ्चवर्णैःपुष्पैर्वा मण्डलपदानां परिपूर्णं कुर्यात् । सितस्य शाल्यादितण्डुलपिष्टं कृष्णस्य पुटदग्धं श्यामस्य क्षुण्णशुष्कपत्रचूर्णं रक्तस्य कौसुम्बं पीतस्य हरिद्राचूर्णं सर्वत्र वर्णानामित्यनुषङ्गः ।

पीतेन कर्णिकां शुक्लैर्बिन्दून् कर्णिकारेखाः पाटलैः केसरावनिं द्विधा कृत्वा श्वेतेन पूर्वभागमुत्तरं तेन केसराणि शुक्लेन बिन्दून् रक्तेन अष्टदळानि श्वेतेन दळान्तानि रक्तैः दळान्तवलयं रक्तेन श्वेतेन वा नाभिमण्डलत्रयं श्यामेन पीतेन रक्तेन अरान्तवलयं कृष्णेन द्वादशाराणि रक्तेन नेम्यन्तमेदिनीं सितेन नेमिं द्वेधा कृत्वा, कृष्णेन पूर्वभागमुत्तरं सितेन अन्तराळानि श्यामेन कृष्णेन वा तद्बहिः पीठं पीतेन पाटलेन श्वेतेन वा तद्बहिर्वीथिकां सितेन लतावितानयुतां शोभाष्टकं रक्तेन अर्धशोभाष्षोडश पीतेनोत्तरादि- द्वारचतुष्टयं क्रमेण शुक्लरक्तपीतकृष्णैः कोणान् कृष्णेन च वर्णैन सर्वत्रान्तराळानि कृष्णेन श्यामेन वा वर्णैरापूर्य चतुष्कोणेषु श्वेतेन शङ्खान् कृत्वा ततो मण्डलाराधनं कुर्यात् ॥

॥ इति मण्डलरचनाक्रमः ॥



॥ श्रीः ॥

चित्रशिखण्डि संहितायां

शाश्वतध्वजस्तम्भस्थापनविधिः

ध्वजस्तम्भस्य पुरतः पार्श्वयोर्वा यथारुचि । मण्टपं कारयेत् धीमान् पूर्ववल्लक्षणान्वितम् ॥ अलंकृत्य वितानाद्यैर्ध्वजतोरणसंयुतम् । ततश्च यजमानेन ऋत्विग्भिस्सह देशिकः ॥ प्रविश्य देवसदनं देवमर्घ्यादिभिः क्रमात् । नैवेद्यान्तं समभ्यर्च्य ततो निर्गम्य देशिकः ॥ ब्राह्मणानामनुज्ञां च लब्ध्वा तत्र तु वै मुने । दक्षिणां दापयेत्पश्चात् मृत्सङ्ग्रहणमाचरेत् ॥ अङ्कुरानर्पयेत्पूर्वं यथोक्ते वासरे गुरुः । ततोऽपरेद्युस्स्तम्भस्य गव्यैः पञ्चभिरूषणम् ॥ मानोन्मानप्रियाणादि-शान्त्यर्थं जुहुयाद्गुरुः । सायाह्ने ध्वजदण्डस्य छायाधिवसनं चरेत् ॥ रक्षाकुम्भं च तत्रैव यमस्य दिशि कल्पयेत् । ब्रह्माणं पूजयेत्कुम्भे करके च सुदर्शनम् ॥ परितः कलशानष्टौ इन्द्रादीन्पूजयेत्क्रमात् । कल्पिते धान्यपीठे तु दशभारेण शालिना ॥ तदर्धं तण्डुलं प्रोक्तं तदर्धं तिल एव च । उपर्युपरि वस्त्रैश्च धान्यपीठे तु कल्पिते ॥ तस्योपरि न्यसेत्कुम्भान् सपिधानान् सरत्नकान् । सलोहान् कूर्च-संयुक्तान्सूत्रवस्त्रादिवेष्टितान् ॥ सौवर्णनिष्कप्रतिमा नाळिकेरयुतास्तथा । दशभारप्रमाणे च शालिपीठं प्रकल्पयेत् ॥ तदर्धं तण्डुलं चैव तदर्धं तिलमेव च । उपर्युपरि संस्तीर्य पीठं कुर्याद्विचक्षणः ॥ तस्योपरि कटाहं तु विन्यसेत्तोयपूरितम् । दर्पणं ब्रह्मकूर्चं च सुगन्धं तत्र निक्षिपेत् ॥ कटाहस्यापि परितः अष्टकुम्भान्विनिक्षिपेत् । हेमरत्न-समायुक्तान् पृथग्वस्त्रैश्च वेष्टितान् ॥ अष्टकुम्भेषु शाखादीन्पूजयेत्

देशिकोत्तमः । कटाहे चिन्तयेत्तत्र क्षीरार्णवमनुत्तमम् ॥ वेदाध्ययन-
घोषैस्तु स्तम्भच्छायां निमज्जयेत् ।॥ पुण्याहोक्तिपुरस्कं तु स्नपनं
नवभिर्घृतैः ॥ स्तम्भस्य देवतां ध्यात्वा तत्त्वानि ह्युपसंहरेत् ।
पृथिवीमप्सु संहृत्य अपोऽग्नौ तु विलुप्य च ॥ संहृत्य वायुना वह्निं
वायुमाकाशतां नयेत् । आकाशाद्यधिदेवं तु करणैर्विषयैस्सह ॥
कुशैश्च नववस्त्रैश्च छादयेद्ध्वजदण्डकम् । युवासुवासा इति च
वस्त्रैराच्छादयेत्ततः ॥ उदुत्तममिति प्रोच्य धर्ममालां च वेष्टयेत् ।
ऋतं चेति ऋचं जप्त्वा स्तम्भच्छायां निमज्जयेत् ॥ चक्रमन्त्रेण
विप्रेन्द्र रक्षां कुर्यात्तु सर्वतः । ततस्तु जुहुयाद्धीमान् संपाताज्येन
सेचयेत् ॥ वास्तुहोमादिकं सर्वमाचरेत्पूर्ववत्क्रमात् । कुम्भमण्डल-
बिम्बाग्निचतुस्स्थानार्चनान्वितम् ॥ नयनोन्मीलनं सर्वं प्रतिष्ठायां
समाचरेत् । ब्रह्मकुम्भस्थतोयेन प्रोक्षयेद्ध्वजदण्डकम् ॥ गन्धपुष्पैः
समभ्यर्च्य अपूपानि निवेदयेत् । स्तम्भं संस्थापयेद्विद्वानधमोत्तम-
मार्गतः ॥ द्वारकुम्भादियजनं वेदपारायणैस्सह । महाकुम्भं समासाद्य
कृतन्यासस्त्वनन्यधीः ॥ महाकुम्भे ध्वजस्तम्भं दैवतं मेरुमाह्वयेत् ।
सुदर्शनं च करके इन्द्रादीन्परिकुम्भके ॥ यष्टिरिन्द्राधिदैवत्या
रज्ज्वनंताधिदैवतत् । ध्वजस्य विहगेशानो वासुकिर्वलये तथा ॥
ब्रह्मा विष्णुश्च रुद्रश्च पेटकानां तु देवताः । घण्टायां देवता लक्ष्मी
र्दर्भमाला सरस्वती ॥ ध्वजपीठाधिदेवाश्च अर्चयेद्देशिकोत्तमः ।
मेखलात्रयसंयुक्तां वेदिकां पद्मभूषिताम् ॥ पूर्वादिदळमारभ्य चोत्त-
रान्तं तु विन्यसेत् । गरुडं पक्षिराजं च सुपर्णं विनतासुतम् ॥
अर्चयेद्दळमध्येषु गंधपुष्पैर्यथाक्रमम् । प्रथमावरणे पूज्या शङ्ख-
चक्रादयोऽब्जज । द्वितीयावरणे पूज्या लोकपालाः स्वदिक्षु वै ॥
तृतीयं मेखलायां तु संपूज्य मण्डलत्रयम् । दण्डाग्रे पूजयेद्देवं विनता
नन्दनं प्रभुम् ॥ एतेषां देवतानां तु कल्प्याः कुम्भाः पृथक्पृथक् ।
प्रतिमा वस्त्रधान्यानि सर्वं पूर्ववदेव तु ॥ ततो मण्डलमाराध्य तत-

शयनकल्पनम् । शालीनां नवभाराणां तण्डुलानर्धसंमितान् ॥ तदर्धं तु तिलांश्चैव उपर्युपरि वस्त्रकैः । संछाद्य चर्मवैयाघ्रं तस्योपरि विनिक्षिपेत् ॥ तस्योर्ध्वं कम्बळं चित्रक्षौमं तदुपरि न्यसेत् । उपधानादिकं तत्र शयनाङ्गं प्रकल्पयेत् ॥ अष्टविंशतिदर्भैश्च कृतं कूर्चं तु शाययेत् । तस्य वायव्यदिग्भागे महाकुम्भं तु सास्त्रकम् ॥ संस्थाप्य गरुडं तत्र करके च सुदर्शनम् । अष्टनागास्तु परितः कुम्भेषु परिकल्पयेत् ॥ शङ्खादिमूर्तीस्तु पुनः कुम्भेष्वष्टसु पूजयेत् । निष्कत्रयं महाकुम्भे करके च द्विनिष्ककं ॥ प्रत्येकनिष्कमानेन परिकुम्भेष्वयं क्रमः । मूर्तिकुम्भेष्वपि तथा प्रतिमास्तत्र निक्षिपेत् ॥ निष्कसङ्ख्यैरथैतेषां वस्त्रैराच्छादनं ततः । ध्वजदण्डं तथाच्छाद्य वस्त्रैरभिनवैश्शुभैः ॥ उत्पाद्य सृष्टिन्यासे च ध्वजदण्डाधिदैवतम् । गन्धादिभिस्समभ्यर्च्य पायसान्नगुडान्नकम् ॥ अपूपादिकमन्यच्च तांबूलान्तं निवेदयेत् । पायसान्नेन च तथा ब्राह्मणान् भगवन्मयान् ॥ भोजयेद्द्वादशमितानधिकान्वा यथावसु । भुक्तवद्भ्यो यथाकामं तेभ्यो दद्याच्च दक्षिणाम् ॥ ततो होमं प्रकुर्वीत ऋत्विग्भिस्सह देशिकः । वेदीनां च चतुर्दिक्षु अग्निकुण्डानि कल्पयेत् ॥ चतुरश्रधनुर्वृत्तं पद्मपूर्वादिषु क्रमात् । कुण्डे वा स्थण्डिले वापि अग्नेरायतनं भवेत् ॥ सुपर्णं पूर्वदिग्भागे गरुडं दक्षिणे तथा । पश्चिमे वैनतेयं तु तार्क्ष्यं चैवोत्तरे न्यसेत् ॥ तत्तत्कुण्डसमीपे तु मूर्तिकुम्भांश्च पूजयेत् । तत्तन्नाम चतुर्थ्यन्तं स्वाहान्तं च हुवेत्क्रमात् ॥ तत्तन्मन्त्रैश्च जुहुयात् समिदाज्यचरून् क्रमात् । अष्टोत्तरसहस्रं तु अष्टोत्तरशतं तु वा ॥ होमावसाने विप्रेन्द्र संपाताज्यं तु सङ्ग्रहेत् । पालाशं पूर्वदिग्भागे खादिरं दक्षिणे तथा ॥ पश्चिमे बिल्वसमिधमौदुम्बरमथोत्तरे । शुद्धान्नं पूर्वदिग्भागे मुद्गान्नं दक्षिणे तथा ॥ पायसं पश्चिमे कुण्डे गुडान्नं चोत्तरे तथा । ध्वजदण्डस्थदेवानां तत्तन्मन्त्रैर्हुवेत्क्रमात् ॥ संपाताज्यं तु संगृह्य स्तम्भदेवान् स्पृशेत्ततः । तत्तद्धोमादिसकलं

शान्तिहोमावसानकम् ॥ संपातसेचनं कृत्वा कूर्चे देशिकसत्तमः । पश्चिमे वृत्तकुण्डे तु कुर्यात्पूर्णाहुतिं ततः ॥ बलिदानं क्रमात्कृत्वा जागरेण नयेन्निशाम् । प्रभाते च समुत्थाय नित्यकर्म समाप्य च ॥ देवपार्श्वं समाश्रित्य देवदेवं प्रपूजयेत् । देवालयाद्विनिष्क्रम्य यागमण्टपमाविशेत् ॥ महाकुम्भं समादाय विन्यसेच्छिष्यमूर्धनि । करकास्त्रं समादाय सेचयेदस्त्रमन्त्रतः ॥ उपकुम्भाष्टकान् सर्वान् वहेयुर्वेदपारगाः । स्वस्तिसूक्तसमायुक्तं छत्रचामरसंयुतम् ॥ स्तम्भपार्श्वं समाश्रित्य पुरतः स्थापयेद्घटान् । पुण्याहं वाचयेद्विद्वान् सङ्कल्पादिकपूर्वकम् ॥ बृहस्पतिं समादाय ज्ञापयेल्लग्नमुत्तमम् । प्रतिष्ठासीति साम्ना च ध्रुवाद्यौरिति मन्त्रतः ॥ महाकुम्भस्थतोयेन प्रोक्षयेत्स्तम्भमुत्तमम् । स्तम्भं गरुडवद्ध्यात्वा न्यासकर्म समाचरेत् ॥ प्रोक्षयेत्सर्वकुम्भांश्च तत्तत्स्थाने यथाविधि । महाहविस्ततो दद्यादाचार्यं पूजयेत्क्रमात् ॥ वस्त्राभरणगन्धाद्यै रलङ्कृत्य सुभोज्य च । दक्षिणां गुरवे दद्यात् शतनिष्कोत्तमं यथा । अथवा च यथाशक्ति दत्वा च प्रतिपूजयेत् ॥

इति चित्रशिखण्डिसंहितायां शाश्वतध्वजस्तम्भस्थापनविधिः ॥

॥ श्रीः ॥

शैवागमसारे

उत्सवनाडिकाभेदाः

भास्करोदयमारभ्य यावद्वै भास्करोदयः । सप्तार्धघटिकामानो यामोऽयं सम्भिरुच्यते ॥ षडुच्छ्वासो भवेत्प्राणष्षट्प्राणो घटिका भवेत् । अहोरात्रमिति प्रोक्तं घटिकाष्षष्टिसङ्ख्यकाः ॥ कालस्तु द्विविधो ज्ञेय स्स्थूलसूक्ष्मविभेदतः । स्थूलस्तु लौकिको ज्ञेय स्सूक्ष्मस्त्वाध्यात्मिको मतः ॥ नित्यकर्माणि सर्वाणि स्थूलकाले समाचरेत् । भास्करोदयमारभ्य यावच्च दशनाडिकाः ॥ प्रातःकालस्समाख्यातः शृण्वन्तु मुनिपुङ्गवाः । पूर्वाह्णात्तु समारभ्य यावच्च दशनाडिकाः ॥ मध्याह्न इति विज्ञेयस्सायंकालस्त्वथोच्यते । मध्याह्नात्तु समारभ्य यावद्वै दशनाडिकाः ॥ सायाह्न इति विज्ञेयः प्रदोषस्त्वधुनोच्यते । सायाह्नात्तु समारभ्य सार्धा वै सप्तनाडिकाः ॥ प्रदोष इति विख्यातस्त्वर्धयामस्त्वथोच्यते । प्रदोषात्तु समारभ्य त्रिपादेन त्रिनाडिकाः ॥ अर्धयाम इति प्रोक्तश्चार्धरात्रमथोच्यते । अर्धयामात्समारभ्य यावच्च तिथिनाडिकाः ॥ मध्यरात्रमिति प्रोक्तं निशान्त स्त्वधुनोच्यते । भास्करस्योदयात्पूर्वं त्रिपादेन त्रिनाडिकाः ॥ निशान्त इति विज्ञेय स्सर्वकर्मविशारदैः । एकद्वित्रितया वापि षड्वाष्टौ वा शरास्तु वा ॥ कालभेदा इमे प्रोक्ता ज्ञात्वा कर्म समाचरेत् । एको मध्याह्नकालस्यादिवारात्रं द्वयं स्मृतम् ॥ प्रातर्मध्याह्नरात्री च इमे कालास्त्रयस्स्मृताः । अर्धरात्रश्च प्रत्यूषः प्रातर्मध्यन्दिनं निशा ॥ पञ्चकाला इमे प्रोक्ताष्षट्कालाश्च ततो द्विजाः । अर्धरात्रश्च रात्रिश्च

॥ श्रीः ॥

शैवागमसारे

उत्सवनाडिकाभेदाः

भास्करोदयमारभ्य यावद्वै भास्करोदयः । सप्तार्धघटिकामानो यामोऽयं सन्धिरुच्यते ॥ षडुच्छ्वासो भवेत्प्राणष्षट्प्राणो घटिका भवेत् । अहोरात्रमिति प्रोक्तं घटिकाष्षष्टिसङ्ख्यकाः ॥ कालस्तु द्विविधो ज्ञेय स्स्थूलसूक्ष्मविभेदतः । स्थूलस्तु लौकिको ज्ञेय स्सूक्ष्मस्त्वाध्यात्मिको मतः ॥ नित्यकर्माणि सर्वाणि स्थूलकाले समाचरेत् । भास्करोदयमारभ्य यावच्च दशनाडिकाः ॥ प्रातःकालस्समाख्यातः शृण्वन्तु मुनिपुङ्गवाः । पूर्वाह्णात्तु समारभ्य यावच्च दशनाडिकाः ॥ मध्याह्न इति विज्ञेयस्सायंकालस्त्वथोच्यते । मध्याह्नात्तु समारभ्य यावद्वै दशनाडिकाः ॥ सायाह्न इति विज्ञेयः प्रदोषस्त्वधुनोच्यते । सायाह्नात्तु समारभ्य सार्धा वै सप्तनाडिकाः ॥ प्रदोष इति विख्यातस्त्वर्धयामस्त्वथोच्यते । प्रदोषात्तु समारभ्य त्रिपादेन त्रिनाडिकाः ॥ अर्धयाम इति प्रोक्तश्चार्धरात्रमथोच्यते । अर्धयामात्समारभ्य यावच्च तिथिनाडिकाः ॥ मध्यरात्रमिति प्रोक्तं निशान्त स्त्वधुनोच्यते । भास्करस्योदयात्पूर्वं त्रिपादेन त्रिनाडिकाः ॥ निशान्त इति विज्ञेय स्सर्वकर्मविशारदैः । एकद्वित्रितया वापि षड्वाष्टौ वा दशास्तु वा ॥ कालभेदा इमे प्रोक्ता ज्ञात्वा कर्म समाचरेत् । एको मध्याह्नकालस्स्याद्दिवारात्रं द्वयं स्मृतम् ॥ प्रातर्मध्याह्नरात्री च इमे कालास्त्रयस्स्मृताः । अर्धरात्रश्च प्रत्यूषः प्रातर्मध्यन्दिनं निशा ॥ पञ्चकाला इमे प्रोक्ताष्षट्कालाश्च ततो द्विजाः । अर्धरात्रश्च रात्रिश्च

प्रत्यूषश्च तथैव च ॥ प्रातर्मध्याह्नसायाह्नौ षट्कालाश्च प्रकीर्तिताः । अष्टसन्ध्यासु या पूजा सा भवेदुत्तमोत्तमा ॥ सप्तषड्भूतवेदाग्नि-युग्मेन्दुप्रहरेषु च । यामार्धकालसंवृत्ता पूजा नवविधा भवेत् ॥ उदये चैव मध्याह्ने प्रदोषे चार्धयामके । यजनं मध्यमं प्रोक्त मधमं चोदयास्तयोः ॥

इति उत्सवनाडिकाभेदाः

संधान सेवा

तीर्थवारिदिवसे प्रातःकाले देवं बद्धकवाटं देवीमन्दिरद्वारं नीत्वा पठनीयश्लोकाः—

अङ्गुल्या कः कवाटं प्रहरति कुटिले माधवः किं वसन्तो
नो चक्री किं कुलालो न हि धरणिधरः किं द्विजिह्वः फणीन्द्रः ।
नाहं घोराहिमर्दी किमसि खगपति नो हरिः किं कपीन्द्रः
इत्येवं गोपकन्याप्रतिवचनजडः पातु नः पद्मनाभः ॥

त्रातुं जगत्परिवृढः कृपया स्वभक्तान्
देवोऽनुभूय सुमहोत्सवमम्बुजाक्षः ।
राधागृहे निशि समागत एष काल्ये
स्थित्वा जवेन कमलाङ्कमभीष्टदोऽस्तु ॥

मृष्टाङ्गरागमभिकीर्णशिरोरुहं त-
द्दष्टाधरं कररुहक्षतमीक्षणं च ।
प्रत्यग्रगन्धमतितान्तमपाङ्गशोणं
खिन्नास्यमङ्गमभिवीक्ष्य रमा जगाद ॥

शय्यां विजह्य दयितामपि वञ्चयित्वा
त्वं प्रस्थितोऽसि ननु कुत्र किमानिशान्तम् ।
निद्राश्रितां तवपदे परिसक्तचित्तां
हातुं कथं तव मनो वद देवदेव ॥

यातोऽस्मि देवि मृगराजमृगाशनाद्यै-
र्दुष्टैर्मृगैरपि तदा क्षणदाचरैश्च ।
श्रुत्वार्तिघोषमटवीं निशि बाधितानां
क्लेशोपशान्तिकरणाय तपोधनानाम् ॥

कुत्रास्ति लोके मृगयापराणां तान्तेक्षणं दन्तनखक्षतं च ।
कीर्णालकं स्विन्नमुखं नितान्तं समीक्षताङ्ग कितवस्य सख्यः ॥

गन्धः काननपुष्पजः कचचयः कीर्णोऽनिलोदाननं
स्विन्नं श्रमकरैर्गतागतिवशात्क्लान्तिं वनं वेशतः ।
तान्तं नेत्रमपाङ्गशोणमभवद्रोषाच्च युद्धोद्भवात्
मृष्टं चन्दनमम्बरस्य कषणाज्जातं क्षतं कण्टकैः ॥

श्रीकृष्णजन्मनि पुरा बहुगोपिकानां
वाचोऽधिगम्य वदसि प्रियमुग्धवाचः ।
युक्तं तदस्तु सकलं मृगयापरस्य
दन्तक्षतं दशनवाससि किं वद त्वम् ॥

रात्रौ महातमसि राक्षसराक्षसीश्च
हत्वा मुदेऽजनिनदश्च मया त्वकारि ।
शङ्खप्रपूरणवशादधरव्रणोऽयं
देवि प्रसीद करवाणि तव प्रमाणम् ॥

रुद्रार्थमाब्धिमथनोद्भवकालकूटं
पीतं त्वया वद भयं तव किं प्रमाणे ।

देवेश देव करणीयमिह प्रमाणं
किं किं वदस्व रमणीयतनो जवेन ॥

मज्जाम्यम्भसि वा स्पृशामि फणिनश्शीर्षं विशामि क्षणात्
ज्वालाजालसमाकुले शिखिनि वा नो चेत्प्रसादो मयि ।
अत्युग्रेष्वपि निर्झरेषु कथितं दिव्यं त्वयापि श्रुतं
कृत्वाहं दयिते सुचित्तमधुना यास्यामि रोषेण किम् ॥

कल्पान्तवारिणिशयस्य जलेन किं ते
शय्या तवोरगपतिर्गरुडध्वज त्वम् ।
संक्रन्दनादिदिविजास्तव सेवकाश्च
कः कृष्णवर्त्मनि करिष्यसि मानबुद्धिम् ॥

वाचं न विश्वसिसि दूषयसि प्रमाणं
का मे गतिः कमलवासिनि कोमलाङ्गि ।
तन्मास्तु मन्युरुपयाति शमं यथा ते
सौख्यं भवेन्मम वदामि तवायताक्षि ॥

सर्वेश सत्त्वगुणयुक्तधियां जनानां
नित्यं सुखं ददाति तावककीर्तनानि ।
शान्तिं यथाश्रितजनप्रिय मे सरोष
श्चैतादृशो गुणवतस्तव सौख्यमस्तु ॥

गाढं बन्धय बाहुना स्तनगिरेः शृङ्गादधः पातय
त्वद्रागाम्बुनिधौ निमज्जय मदीयाङ्गं तवैवार्पितम् ।
कृत्वा चारुकटाक्षशृङ्खलमथो दत्वा क्षतं त्वन्नखैः
पश्चाद्विभ्रमधाम्नि निग्रहय मां नागां प्रियेहं यथा ॥

इत्थं निशम्य मधुरैर्वचनैः प्रियस्य
अन्तर्विहस्य मनसा पतिमाविशन्ती ।

तं प्रत्युवाच विनयात् कमलायताक्षी
भर्तुः पदे विगतरोषवती कृतार्था ॥
मच्छेषभूतकुसुमाम्बरचन्दनानि
दत्वा क्षमस्व मम कान्त मया कृताङ्गः ।
सार्धं मया तव भुजान्तरवासरत्या
क्रीडागृहं प्रविश देव सुखं मदीये ॥
अङ्गीकृत्य मुदा तदा विटजनाभिज्ञो गृहं कान्तया
सार्धं मङ्गलमज्जनार्थमविशत्संसेव्यमानस्सुरैः ।
सर्वाभीष्टफलप्रदाननिरतः सेवाजनानां मुहुः
पायाद्वः परमेष्ठिनार्चितपदो भद्रापुरीकेशवः ॥

॥ इति संधानसेवा ॥

अथ पडिमाल

महाजनागाधमहौघसत्त्वं वेदोदकं शास्त्रतरङ्गशोभितम् ।
अलङ्घनीयं गुरुदेवतीर्थं सभासमुद्रं शिरसा नमामि ॥

लक्ष्मीनाथकृपावलब्धमहति श्रीपाञ्चरात्रागमान्
तत्तद्वैदिकतान्त्रिकप्रणयिनः पूज्याविलासाश्रयान् ।
भारद्वाजवतापगायनसुधीशाण्डिल्यमौञ्ज्यायनान्
पञ्चर्षीन् सहकौशिकान् कुलगुरून् वन्दे महायोगिनः ॥
पाषण्डद्रुमषण्डदावदहनश्चार्वाकशैलाशनिः
बौद्धध्वान्तनिरासवासरपति जैनेभकण्ठीरवः ।

मायावादिभुजङ्गभङ्गगरुडस्त्रैविद्यचूडामणिः
श्रीरङ्गेशजयध्वजो विजयते रामानुजोऽयं मुनिः ॥

पाषण्डषण्डगिरिखण्डनवज्रदण्डाः प्रच्छन्नबौद्धमकरालयमन्थदण्डाः ।
वेदान्तसारसुखदर्शनदीपदण्डा रामानुजस्य विलसन्ति मुनेस्त्रिदण्डाः॥

चारित्रोद्धारदण्डं चतुरनयपथालङ्क्रियाकेतुदण्डम्
सद्विद्यादीपदण्डं सकलकलिकथासंहृतेः कालदण्डम् ।
त्रय्यन्तालम्बदण्डं त्रिभुवनविजयच्छत्रसौवर्णदण्डम्
धत्ते रामानुजार्यः प्रतिकथकशिरोवज्रदण्डं त्रिदण्डम् ॥

त्रय्या माङ्गल्यसूत्रं त्रियुगपदयुगारोहणालम्बसूत्रम्
सद्विद्यादीपसूत्रं सगुणनयविदां सम्पदां हारसूत्रम् ।
प्रज्ञासूत्रं बुधानां प्रशमधनमनःपद्मिनीनाळसूत्रम्
रक्षासूत्रं मुनीनां जयति यतिपतेर्वक्षसि ब्रह्मसूत्रम् ॥

पाषण्डसागरमहाबडबामुखाग्निश्श्रीरंगराजचरणाम्बुजमूलदासः ।
श्रीविष्णुलोकमणिमण्डपमार्गदायी रामानुजो विजयते यतिराजराजः ॥

उदयरविसहस्रज्योतिषं दुर्निरीक्ष्यं
प्रळयजलधिनाथं कल्पकृद्वह्निवक्त्रम् ।
सुरपतिरिपुवक्षच्छेदरक्षोक्षिताङ्गं
प्रणतभयहरं तं नारसिंहं नमामि ॥

देवेशस्य रमापतेर्भगवतस्सेवार्थमुद्योगिनां
विप्राणां निजकर्मनिष्ठमनसां राज्ञां प्रभूणां नृणाम् ।
एतत्स्थाननिवासिनां प्रतिवचः कर्तुं समुत्साहिनां
आशीर्वादमहं करोमि विदुषां सद्ब्रह्मघोषाशिषा ॥

॥ श्रीः ॥

महोत्सवप्रयोगोक्त

मुख्यशब्दार्थविवरणम्

अभिगमनम् —जपध्यानार्चनस्तोत्रैः कर्मवाक्चित्तसंयुतैः । अभिगच्छेज्जगद्योनिं तच्चाभिगमनं स्मृतम् ॥

अग्निप्राकारमन्त्रः —ओं रां नमः पराय कालानलात्मने नमः ।

अष्टाङ्गपूजनम् — श्रीप्रश्ने ह्यागमाद्यमङ्गस्स्याद्योगपीठे प्रपूजनम् । द्वितीयमङ्गं स्नपनं तृतीयं वेषपूजनम् । तुर्यं भोज्यासने विष्णोः पूजनं पञ्चमं ततः ॥ गुरोश्शुद्धिप्राशनं तु षट्कं नित्याग्निपूजनम् । सप्तमं तूत्सवो नित्यश्चाष्टमाङ्गमुदीरितम् ॥ श्रीप्रश्ने जयाख्ये पारमेश्वरे च ।

अष्टोपचाराः —पादुके दन्तकाष्ठं च जिह्वानिर्लेखनं तथा । मुखप्रक्षाळनं चैव तैलमुद्वर्तनं तथा ॥ शिरस्यामलकं तोयं रजनीसारमेव च । अष्टोपचारं देवस्य स्नानासनपरिग्रहे ॥

अभ्युपगमन्यायः —साधितः परतन्त्रेषु यः स्वतन्त्रे समाश्रितः । सह्यभ्युपगमो न्यायो मनसोनुमतिर्यथा ॥ पाञ्चरात्ररक्षायां निगमान्तगुरुः ।

अभ्युक्षणम् —करेण जलमादाय ऊर्ध्वाङ्गुष्ठेन मुष्टिना । अभितस्सेचयेत्तत्र ह्यभ्युक्षणमुदाहृतम् ॥

अर्जुन —वृक्षविशेषः ।

अवोक्षणम्—जलमादाय हस्तेन दक्षिणेनाथ देशिकः। अवाक्करतलं कृत्वा सेचनं तदवोक्षणम् ॥

अस्वतन्त्रालयः—ग्रामादिकं पुरा कृत्वा पश्चादालयकल्पनम्। अस्वतन्त्रमिति ख्यातम् ॥

अङ्कुशमन्त्रः—ओं सर्वाकर्षकर महामायाय अङ्कुशाय फट्।

अग्निमुद्रा—जयाख्ये। पद्माकारौ करौ कृत्वा अङ्गुष्ठादिकनिष्ठिके। सम्मिलय चाग्रदेशास्तु कर्णिकैवं यथा द्विज ॥ तर्जन्यादित्रयं शेषं ऊर्ध्वगं च करद्वयात्। असंलग्नं तु निक्षिप्य मुद्राग्नेरसंप्रकीर्तिता ॥

आज्यपात्रं—विष्णुतिलके। अधस्तादाज्यपात्रं तु विस्तारं चतुरङ्गुलम् ॥ उपर्यष्टाङ्गुलं वृत्तं तन्नाळं हस्तसम्मितम्। प्रणीता प्रोक्षणी चैव नाळहीनं तु कारयेत् ॥

आज्यसंस्काराः—प्रोक्षण, ताडन, स्पर्शनाधिश्रयण, उपाधिश्रयण, परिवर्तन, प्रसादीकरण, सम्प्लवोपप्लव, पवित्रीकरण, उपयाम, उपयोजन, निरञ्जीकरण, निरीक्षण, अवकुण्ठन, अमृतीकरणाख्य पञ्चदशसंस्काराः ॥

आघाराहुतिः—अनिलादग्निपर्यन्तं आघारं प्रथमं हुवेत्। नैर्ऋतेशानपर्यन्तमाघारं तु द्वितीयकम् ॥

आवाहनमन्त्रः—ओं ओं ओं परमधामावस्थितमदनुग्रहकाम्ययोद्यतावतार इहाभिमत सिद्धिद मन्त्रशरीरों नमो नमः ॥ जयाख्ये ईश्वरे च।

आवाहनम्—लक्ष्मीतन्त्रे। नित्या सम्पूर्णषाड्गुण्या या विष्णोर्मूर्तिरुज्ज्वला। सैवेयं कथ्यते मूर्तिमान्त्री मन्त्रैश्चिदात्मकैः ॥ स्वीकारयति तां मन्त्री देवं यत्स्वेन तेजसा। तदावाहनमित्युक्तं मन्त्रविज्ञानपारगैः ॥

आवाहनाष्टाङ्गम् — परस्य सूक्ष्मस्य तथा स्थूलस्य तदनन्तरम् । चिन्ता संक्रमणं तस्य बिम्बे प्रत्युद्गमस्तथा ॥ स्वागतोक्तिर्नमस्कारस्साम्निध्यप्रार्थनं तथा । इत्यावाहनमष्टाङ्गं परस्य परमात्मनः ॥ पाद्मे ।

आश्रयालयः — स्वतन्त्रालयक्लृप्तासु रथ्यावीथीषु पद्मज । अन्तरे स्थापितं यत्तदाश्रयं समुदाहृतम् ॥

उद्वर्तनद्रव्यम् — वासिष्ठे । चन्दनं घनसारं वा मकरन्दमथापि वा । माषमुद्गादिचूर्णं वा तक्रं जम्बीरमेव वा ॥ तिन्त्रिण्याश्च कषायं वा केशरंजनमाचरेत् ।

उत्तरीयधारणम् — देवागारे गवांगोष्ठे ब्राह्मणानां क्रियोदये । आचामे भोजने जप्ये दक्षिणं बाहुमुद्धरेत् ॥ इति भृगुः ।

उषःकालः — पञ्च पञ्च उषःकालस्सप्तमं चारुणोदयः । अष्टपञ्च भवेत्प्रातस्तच्छेषो दिनमुच्यते ॥

कलाध्वा — ओंकारान्तमकारान्त्यं कलाध्वानमिति स्मृतम् ।

कूर्चमानम् — द्वादशैर्नवभिर्दर्भैस्सप्तभिः पञ्चभिस्तु वा । तालद्वयप्रमाणेन ब्रह्मकूर्चं तु कारयेत् ॥ अङ्गुलिद्वयमानेन ब्रह्मग्रन्थिं च कारयेत् । पञ्चाङ्गुलं तदर्धं तु चतुरङ्गुलमेव वा ॥ ततः कलशकूर्चानि पञ्चभिस्त्रिभिरेव वा । दर्भैस्तु कारयेद्ब्रह्मन् षोडशाङ्गुलमानतः ॥ ग्रन्थिमेकाङ्गुलं कुर्यात् तदग्रं चतुरङ्गुलम् । शेषमष्टाङ्गुलं प्रोक्तं कूर्चमानमिहोच्यते ॥ महाकुम्भस्य कूर्चं च शान्तिवर्धनिकस्य च । ब्रह्मकूर्चसमं कुर्याद्देशिकस्तन्त्रपारगः ॥ विष्णुसंहितायां शान्तिकेऽधोमुखान्येव पौष्टिकेतून्मुखानि च, इति ।

कृसरान्नम् — क्षीरं त्रिभागं भागस्तु तण्डुलाः पायसस्य तु ।

क्षीराज्यतण्डुलतिलाः समाः स्युः कृसरात्मके ॥ इति ईशानगुरुदेवः ।

खड्गमन्त्रः—ओं महामायाय बन्धध्वंसिने खड्गाय फट्, सात्वते ।

खेटमन्त्रः—ओं सर्वास्त्रग्रसनपराय खेटाय फट्, सात्वते ।

किरीटमन्त्रः—ओं नमः किरीटाय समस्तमकुटेश्वराय कोटिरविनियुतभानूद्भूतदीप्तानलनिभाकल्पाधिपतये ह्रीं क्रीं हुं फट् स्वाहा । पाद्मीयं । ओं सहस्रदीधितिच्छुरितविग्रहाय किरीटाय नमः । सात्वते ।

कृष्णमन्त्रः—क्लिं, कृष्णाय गोविन्दाय, गोपीजनवल्लभाय स्वाहा । इति नारदपाञ्चरात्रे ।

कौस्तुभमन्त्रः—ओं नमः कौस्तुभाय रत्नाधिपतये अमृतोद्भवाय आकल्पाधिपतये सिद्धिं प्रयच्छ स्वाहा । पाद्मोद्धृतम् ॥ ओं टं हूं टं नमः प्रभात्मने कौस्तुभाय स्वाहा । जयाख्ये ॥ ओं वाञ्छितसिद्धिप्रदाय महाचिन्तामणये कौस्तुभाय नमः । सात्वते ॥

गदामन्त्रः—ओं नमो भगवत्यै गदायै भवरूपिण्यै कौमोदक्यै हुं फट् स्वाहा । पाद्मीयं ॥ ओं ग्लैं जूं नमः सहस्रा श्रीगदे स्वाहा । जयाख्ये ॥ ओं विघ्नेश्वरार्चितायै गदायै फट् । सात्वते ॥

घटदीपः—हिरण्यगर्भे । पञ्चविंशाङ्गुलायामं विस्तारं तत्समं भवेत् । मुखं नवाङ्गुलं प्रोक्तं पादं च चतुरङ्गुलम् ॥ नाळं सप्ताङ्गुलोत्सेध मष्टपत्रं सकर्णिकम् । एवमेवप्रकारेण घटदीपस्य लक्षणम् ॥

घण्टामन्त्रः—ह्रूं ह्रूं घण्टायै नमः । पाद्मे ॥ ओं क्ष्रीं जगद्ध्वनिमन्त्रे मात्रे स्वाहा । जयाख्ये ॥

घृतारोपणम् —देवस्य पुरतः स्थाप्य पात्रं लोहविनिर्मितम् । घृतेनापूर्य तत्पात्रं प्राग्वत्संस्कृत्य देशिकः ॥ उभाभ्यां चैव हस्ताभ्यां दूर्वामादाय मूलतः । घृते निमज्य चाग्राणि देवपादेषु सेचयेत् ॥ ततस्तु कण्ठपार्श्वे तु ततो देवस्य मूर्धनि । पाणिप्रक्षाळनं कुर्यादन्तरान्तरयोगतः ॥ दूर्वाभेदस्तथाप्रोक्तो घृतारोपणकर्मणि । हस्तविन्यासमार्गेण घृतारोपणमाचरेत् । पादे सुमंगलं चेति कण्ठे भद्रमिति द्विज ॥ सुशोभनं तु शिरसि क्रमान्मन्त्राः प्रकीर्तिताः । यद्वा सर्वस्य मन्त्रस्य द्वादशाक्षरसंज्ञकम् ॥ पाद्मे ।

चक्रमन्त्रः—ओं नमो भगवते सुदर्शनाय । पाद्मे ॥ ओं ज्रः क्रः फट् हुं नमः, फट्फट्फड्विष्णुचक्राय स्वाहा । जयाख्ये । ओं कालकर्त्रे चक्राय फट् । सात्वते ॥

चतुर्थस्नपनं— प्रतिष्ठानन्तरं चतुर्थेऽहनि कर्तव्यस्नपनमित्यर्थः ।

चतुर्दश ओषधयः— विष्णुपुराणे पारमेश्वरे च । व्रीहयस्सयवा माषा गोधूमा अणवस्तिलाः । प्रियङ्गुस्सप्तमा ह्येते अष्टमास्तु कुलुत्थकाः ॥ श्यामाकास्त्वथ नीवारजर्तिलास्सगवीधुकाः । तथा वैणयवाः प्रोक्तास्तद्वन्मर्तुकका मुने ॥ ग्रामारण्यास्स्मृता ह्येताः ओषध्यस्तु चतुर्दश ॥

जाग्रद्व्यूहमन्त्रचतुष्टयं— ओं अमाधुराय अळर्तमयाय योगीश्वराय चक्रिणे सुपर्णध्वजाय पीतवाससे वासुदेवाय नमः । ओं आसानन्दिने संवर्तकिने तालकेतवे नीलवाससे कामपालाय सङ्कर्षणाय रामाय नमः । ओं अं शार्ङ्गधृते मकरध्वजाय रक्तवाससे सनत्कुमाराय जगत्प्रियाय प्रद्युम्नाय नमः । ओं अः नन्दकानन्दकार ऋष्यध्वजाय अनिरुद्धाय सितवाससे विष्व-

क्सेनाय नमः । सात्वते ॥

तर्पणं— अपक्वैरतिपक्वैश्च सुपक्वैर्जलपक्वकैः । पानीयैरिक्षुशकलैर्नारिकेलजलैरपि ॥ एतैस्तु तर्पयेद्देवं तर्पणं समुदाहृतम् ॥

तत्वाध्वा— तत्वाध्वानं प्रवक्ष्यामि विस्तरेण यथाक्रमम् । जीवतत्त्वं रूपतत्त्वं द्विविधं तत्त्वमीरितम् ॥ जीवप्राणो मनोबुद्धिरहङ्कारोऽथ शब्द च । स्पर्शं रूपं रसो गन्धश्श्रोत्रत्वक्कालुजिह्वकम् ॥ घ्राणवाक्पादपाणिं च पायूपस्थाधरापकम् । वह्निर्वायुस्तथाकाशं जीवतत्त्वमिदं भवेत् ॥ ब्रह्मा विष्णुश्च रुद्रश्च नवब्रह्मादयस्तथा । वसवस्सप्तमरुतस्त्रयस्त्रिंशत्कोटिदेवताः ॥ रूपतत्वमिदं प्रोक्तं, विष्णुरहस्ये ।

ताळत्रयम्— दक्षेण वामं संताड्य वामहस्तेन दक्षिणम् । वामं दक्षिणहस्तेन कुर्यात्ताळत्रयं बुधः ॥ एकताळेन मरणं द्विताळे व्याधिपीडनम् । त्रिताळे सुखमाप्नोति तस्मात्ताळत्रयं कुरु ॥ विहगेन्द्रे ॥

तिस्रो रेखाः— याम्यादिचोत्तरान्तं तु प्रथमं विलिखेद्बुधः । पश्चिमादिस्तु पूर्वान्तं पश्चादुल्लेखनं क्रमात् ॥ उल्लिखेदस्त्रराजेन दर्भकाण्डेन यत्नतः । कालोत्तरे ।

त्रिकर्माणि— दानमध्ययनं ब्रह्मन् यजनं त्रीणि तत्पृथक् ।

दशोपचाराः—वस्त्रं यज्ञोपवीतं च गन्धालेपनभूषणम् । पुष्पमञ्जनमादर्शं धूपं दीपं च मातृकम् ॥ दशोपचारं देवस्य अलङ्कारासनेषु च ॥

दन्तकाष्ठं—जयाख्ये । नवाष्टसप्तषट्कं चाङ्गुलो ब्राह्मपूर्वकम् । दद्यात्स्त्रीबालपर्यन्तं गुरोर्वै द्वादशाङ्गुलम् ॥ दीक्षाध्यायोपयुक्तं ।

दण्डमन्त्रः— ओं संतापकाय दर्पविध्वंसिने दण्डाय फट् ।

दीपारोपणं—अनिरुद्धे । दक्षिणं पादमारभ्य वामपादं तु पश्चिमम् । वाद्यमङ्गळसंयुक्तं गीतमङ्गळसंयुतम् । दीपमारोपयेन्मन्त्री उद्दीप्यस्वेति मन्त्रतः ॥

देवांशं—कारिभ्यः प्रदेयांशस्य देवांशत्वेन व्यवहारः । कारी अर्चकः ।

धान्यपीठं—श्रीप्रश्ने । तस्यां धान्यादिपीठं च चक्रवत्परिकल्पयेत् । चक्राब्जमण्डलं तस्मिन् विलिखेद्दळसंयुतम् ॥ कर्णिकायां मुख्यकुम्भं परितो द्वादशान्घटान् । उत्तरे करकं न्यस्य गन्धोदैः पूरयेद्घटान् ॥ घटेषु तेषु प्रतिमास्तत्तन्मूर्तिविलेखिताः । निक्षिपेत्त्वरितानष्टौ मङ्गळान् स्थापयेद्गुरुः ॥ दीक्षाध्यायोपयुक्तधान्यपीठम् ।

धृतिसंमितैः—अष्टादशाङ्गुलैः । तन्त्रसमुच्चये ।

धूपमन्त्रः—ओं हां अनन्ताय कालाग्निरूपाय जगद्धूमसुगन्धिने सर्वगन्धवहाय नमः स्वाहा । इति सात्वते ॥ ओं ध्यूं धूमोद्गिराय नमः । इति पाद्मे ॥

नवोपचाराः—अर्हणं प्रापणं तर्पणं तथा ताम्बूलं तिलदानं जपहोमबलिक्रिया । नवोपचारं देवस्य भोज्यासनपरिग्रहः ॥

नमस्वाहादियोगः—न्यासे नमोन्तस्स्वाहान्तः जपपूजाहुतीष्वपि । वश्ये चाकर्षणविधौ उच्चाटे हुंकृतिर्भवेत् ॥ मारणे फट्कृतिर्ज्ञेया स्तम्भविद्वेषमोहने । नतिं विनाङ्गमन्यत्स्याद्धर्मादौ नतिरेव सा ॥ अन्यत्र । हविर्होमे प्रयोक्तव्यः स्वाहान्तं सकलं मुने । अभ्यन्तोपचारेष्वप्यागच्छान्तोभिमुखी कृतिः ॥ क्षमस्वान्तो विसर्गे तु नमोन्तश्चान्यकर्मणि ॥ विष्णुसंहितायां ।

नयकर्म—उपनयनकर्म ।

नामत्रयमन्त्राः—अच्युताय नमः, अनन्ताय नमः, गोविन्दाय नमः ।

नाभिकन्दः— कन्दस्थानं मनुष्याणां देहमध्ये नवाङ्गुलम् ।

पतद्ग्रहं— बिम्बार्धार्धायतं वापि सुवर्णरजतादिभिः । दत्तूरकुसुमाकारं कारयेत पतद्ग्रहम् ॥ सात्वते ।

पर्यग्निकरणं— जयाख्ये । पर्यग्निकरणं कुर्यात् हृदयेनार्द्रपाणिना ॥

पञ्चशुद्धिः— स्थानशुद्धिः पात्रशुद्धिः बिम्बशोधनमेव च । आत्मनो भूतशुद्धिश्च मन्त्रशुद्धिस्ततो रमे ।

प्रणमाष्टाङ्गः— पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा । मनसा वचसा चैव प्रणामोऽष्टाङ्ग उच्यते ॥

परशुमन्त्रः— ओं अज्ञानखण्डनपराय परशवे फट् । सात्वते ।

परिषेचनं— नारदीये । चुळकं पूरयित्वा तु वारिणा परिषेचयेत् ।

पञ्चाङ्गभूषणं— हारोपवीतं कटकैः केयूरैरङ्गुलीयकैः । पञ्चाङ्गभूषणैरेतैः भूषितस्सोत्तरीयकः ॥

पञ्चामृतं—पयो दधि घृतं ब्रह्मन् माक्षिकं मधुशर्करा । एतेषां तु समाहारात्पञ्चामृतमुदीरितम् ॥

पदाध्वा—पदाध्वानं प्रवक्ष्यामि संक्षेपेण महामुने । प्रथमं केशवादिश्च द्वितीयं दशमूर्तयः ॥ विश्वाद्यास्तु तृतीयं तु कुमुदाद्याश्चतुर्थकम् । इन्द्राद्याः पञ्चमं चैव कुमाराश्चैव षष्ठकम् ॥ सप्तमं विमलाद्याश्च वाप्याद्यास्त्वष्टमं भवेत् । श्रियादिनवमं चैव श्रीवत्साद्यास्तथा परम् ॥ पदाध्वानमिति प्रोक्तं तत्त्वज्ञैः पाञ्चरात्रिकैः ॥ विष्णुरहस्ये ।

पद्ममन्त्रः—जयाख्ये । ओं ब्सुं नमः श्रीनिवासपद्माय स्वाहा । पाद्मे । ओं आदित्यप्रतिमाय मायारूपिणे हुं फट् स्वाहा ॥ ओं विश्वात्मने विश्वप्रदाय पद्माय फट् । सात्वते ।

पञ्चोपचाराः— आसनं पाद्यमाचाममर्घ्यं च मुखवासकम् । पञ्चोपचारं देवस्य मन्त्रासनपरिग्रहः ॥

पाशमन्त्रः— ओं त्रैलोक्यमोहनमूर्तये पाशाय फट् । सात्वते ।

प्रसादमन्त्रः— ओं ई ह्रीं ह्रीं हंसपरपरमेश प्रसीद ओं नमः ।

प्रद्युम्नमन्त्रः— ओं नमो भगवते प्रद्युम्नाय स्वाहा ।

प्रणाळभागः— भद्रासनपरं स्थानम् ।

प्रापणं— फलपक्वरसादीनि भक्ष्यभोज्यादिसंयुतम् । मधुरादिरसोपेतं प्रापणं समुदाहृतम् ॥

प्राणायामः— पूरणाद्रेचनाद्वायोः रोधनाच्चापि यः श्रमः । भवेत्प्राणकृतं पुंसां प्राणायामस्स उच्यते ॥ पाद्मे । प्रमाथिनो दृढस्यास्य चञ्चलस्य तु चेतसः । समाधियोग्यतासिद्ध्यै प्राणादिविजयाय च । तमोनिबर्हणार्थं च कुर्यात्प्राणायतीरथ ॥

पुण्डरीकाक्षविद्या— जितं ते पुण्डरीकाक्ष इति मन्त्रः ।

पूर्णाहुतिः— न्यूनं वाप्यधिकं वापि प्रमादात्कर्म यत्कृतम् । ययाहुत्या च पूर्णं स्यात् सा तु पूर्णाहुती स्मृता ॥

प्रोक्षणं— हस्तेन वारि संगृह्य तत्तलं चाप्यधोमुखम् । संसेचनं तु यत्कुर्यात्तत्प्रोक्षणमितीर्यते ॥

बलिमानं— सारसमुच्चये । उत्तमं कबळं प्रोक्तं मध्यमं मुष्टिमात्रकम् । अधमं त्वाहुतेर्मानं बलिमानं त्रिधा भवेत् ॥

बालाग्निः— अरण्या मथितो वह्निर्बालसंज्ञश्चतुर्मुख ।

बाहुमाला— बाहुमालां ततः कुर्यान्मल्लिकामुकुळोपमैः ।

बिम्बाकृतिः— बिम्बं—आराधकैर्यथारुचि सुवर्णरजतादिभिः निर्मिता प्रतिमा, तस्य आकृतिरिव आकृतिर्यस्य सः बिम्बाकृतिः । स चासौ आत्मा चेति कर्मधारयः ।

भुवनाध्वा— वक्ष्यामि भुवनाध्वानं सावधानमनाश्शृणु । अतलं वितलं चैव नितलं च तलातलम् ॥ महातलं च प्रतलं पाताळं चेति सप्तमम् । भूलोकं च भुवर्लोकं सुवर्लोकं तथैव च । महर्लोकं

जनोलोकं तपोलोकं च सत्यकम् ॥ याम्यं निर्ऋतिलोकं च वायुलोकं तथैव च । ततोऽधिकं विष्णुलोकं महाविष्णो स्तथैव च । नित्यं विष्णोस्सदा लोकमेते लोकाः प्रकीर्तिताः ॥ मन्त्राध्वानं मूर्ध्निदेशे पदाध्वानं मुखे न्यसेत् । तत्त्वाध्वानं हृदि न्यस्य नाभौ तु भुवनाध्वकम् ॥ वर्णाध्वानं मेढ्रदेशे पादयोस्तु कलाध्वकम् ॥ इति विष्णुरहस्ये ।

मधुपर्कः– फलान्येलाफलं सर्पिः शर्करा च मधून्यपि । पञ्चानामपि संयोगो मधुपर्क इतीरितः ॥ हिरण्यगर्भे, गोधूमतण्डुलैः पिष्टशर्करादधि दुग्धकम् । पीड्याज्यमधुसंयुक्तं मधुपर्कमिति स्मृतम् ॥

मुद्गरमन्त्रः– ओं अखण्डितपराक्रमाय मुद्गराय फट् ।

मन्त्रः– मननात्प्राणिनस्त्राति यतो मन्त्र उदीर्यते । पाद्मे । मननं सर्वतत्वानां त्राणं तु भवसागरात् । मननत्राणसंयोगान्मन्त्र इत्युच्यते बुधैः ॥

मन्त्राध्वा– विष्णुरहस्ये । मन्त्राध्वानं शृणु मुने रहस्यं परमं त्विदम् । अष्टाक्षरं प्रथमतः पश्चाच्च द्वादशाक्षरम् ॥ षडक्षरं तथा प्रोक्तं विष्णुगायत्रमेव च । वासुदेवादिमन्त्राणि मीनादिदशमन्त्रकम् ॥ सुदर्शनमहामन्त्रं हयग्रीवस्य मन्त्रकम् । श्रियादिपत्निमन्त्रं च अनन्तं गरुडं तथा ॥ विष्वक्सेनस्य मन्त्रं च तद्गणेन्द्रादि-मन्त्रकम् । मन्त्राध्वानमिति प्रोक्तं पञ्चरात्रविशारदैः ॥ इति विष्णुरहस्ये ॥

मुखवासः— विष्वक्सेने । क्रमुकस्य फलं भिन्नमपक्वं पक्वमेव वा । कर्पूरतैलसंसिक्तमसिक्तं वा मुनीश्वर ॥ ताम्बूलवल्लीपत्रैश्च तप्तहेमप्रभाधरैः । एलातक्कोलजातीभिः कर्पूरसहितं क्रमात् ॥ मातुलुङ्गफलैर्युक्तं नाळिकेरफलान्वितम् । शिलाचूर्णेन संयुक्तं

कर्पूरसहितं तथा ॥ संस्कृतं प्रणवेनैव मुखवासं निवेदयेत् ।
नारदीये ॥ नागवल्लीदलैर्युक्तं शुभैःपूगफलैर्युतम् । कर्पूर-
क्षोदसंयुक्तं गन्धैश्च विविधैर्युतम् ॥ मातुलुङ्गफलैर्युक्तं नारि-
केळफलान्वितम् ॥ एलालवङ्गतक्कोलजातीभिश्चान्वितं शुभम् ।
मुखवासं शुभं विद्यात् ताम्बूलमिति च द्विज ॥

मुसलमन्त्रः— ओं प्राग्भवनाधिपतये स्तम्भभूताय मुसलाय हुं फट् ।
सात्वते ॥

योगपीठं— बिम्बेन सहितं पीठं योगपीठमुदाहृतम् ।

योगपीठमन्त्रः— सनत्कुमारे । ओं नमःपदमाभाष्य तथा भगवते
पदम् । विष्णवे च समाभाष्य सर्वभूतात्मने पदम् ॥ वासु-
देवायेति चोक्त्वा सर्वात्मेति पदं वदेत् । सुयुतयोग इत्युक्त्वा
पद्मपीठात्मने पदम् ॥ पीठं च नमसा युक्तं पीठमन्त्र इती-
रितम् । ज्ञानार्णवे ॥ प्रणवं हृदयं चैव प्रोक्त्वा भगवते
पदम् । विष्णवे च समाभाष्य सर्वभूतात्मने पदम् ॥ वासु-
देवाय सर्वात्मसुयोगपदमुच्चरेत् । योगपद्मपदं जप्त्वा ततः
पीठात्मने नमः ॥ इत्येवं पीठमन्त्रेण संपूज्य तदनन्तरम् ।
तन्त्रसमुच्चये च ॥

यौवनाग्निः— सूर्यकान्तशिला जन्मा यौवनाग्निरुदाहृतः ।

रहस्याम्नायगोपिन्— पाञ्चरात्रिकः । अहिर्बुध्न्यसंहितायाम् ।

लक्ष्मीनारायणमन्त्रः— ओं नमो भगवते लक्ष्मीनारायणाय स्वाहा । पाद्मे ।

वलजं— वलजं तोरणं द्वारमिति निघण्टुः ।

वज्रमन्त्रः— ओं दर्पप्रशमनकर्त्रे वज्राय फट् । ०७८७

वटकं— एकभागं गन्धवस्तु कटुकं तु द्विभागतः । वटकेशस्त्रिभागी
च सर्वाण्येकत्र चूर्णयेत् ॥ भर्जयित्वा च संचूर्ण्य समशर्करया
सह । मधुसर्पिश्च संयोज्य देवाय विनिवेदयेत् ॥ विष्णुतिलके ।

वटुः— वर्षाच्छोडशादर्वाक् वटुरित्यभिधीयते ।

वनमालामन्त्रः— ओं ल्स्विं नमः स्थलजलोद्भूतभूषिते वनमाले स्वाहा। ओं सौभाग्यजननि सर्वप्रदे वनमालायै नमः । सात्वते ।

वर्णाध्वा— ककारादिक्षकारान्तं वर्णतत्त्वमिति स्मृतम् ।

वासुदेवः— वसन्ति त्वयि भूतानि ब्रह्माण्डे हि युगक्षये । त्वमावससि भूतेषु वासुदेवस्ततोच्यसे ॥ मत्स्यपुराणे ।

विप्लुड्भिः— बिन्दुभिरित्यर्थः । सात्वतभाष्ये ।

विसर्जनमन्त्रः— भगवन्मन्त्रमूर्ते स्वपदमासादयासादय । जयाख्ये । ईश्वरे । आवाहने तथार्चायां विसर्जनविधौ तथा । प्रणवं पूर्वमुद्धृत्य संबोध्य भगवन्निति ॥ मन्त्रमूर्ते पदं दद्यात्स्वपदं च द्वितीयया । आसादय क्षमस्वेति प्रणवान्तं समुद्धरेत् ॥ ओं भगवन्मन्त्रमूर्ते स्वपदमासादयासादय क्षमस्व ओमिति उद्धृतमन्त्रः ॥

विशिनष्टि— प्रशंसा ।

विष्णुहस्ते— पारमेश्वरव्याख्यायां भोज्यासनप्रकरणे । विष्णुष्षाड्गुण्यपाणौ यस्मिन् सः विष्णुपाणिस्तेन विष्णुपाणिना । तथैव वक्ष्यते ततस्त्वदक्षिणे हस्ते विज्ञानैश्वर्यशक्तिभिः। स्मर्तव्या स्वस्वमन्त्रेण भोजकाः करणात्मकाः ॥ तेनाथ विष्णुहस्तेन परमान्नपुरस्सरं। स्पृष्ट्वा स्पृष्ट्वा यथायोगं बद्ध्या ग्रासमुद्रया ॥ निवेदनीया वै विष्णोरन्नमूर्त्यन्तरास्थिताः। रसरूपादिभेदोत्थाः तेजोरूपबलात्मिकाः ॥ षाड्गुण्यविग्रहस्यापि देवस्यार्चाभिमानिनः। प्रीणनं परमं ह्येतत् विद्धि मन्त्रैस्सुसंस्कृतैः॥

वृद्धाग्निः— वृद्धाग्निरुच्यते ब्रह्मन् श्रोत्रियागारसम्भृतः ।

शङ्खमन्त्रः— ओं ह्रूं ह्रूं ह्रूं नमः महाशङ्खाय स्वाहा । जयाख्ये । ओं नमो भगवते पुण्डरीकाक्षाय वायुमुखाय दीप्तरूपाय शङ्ख-

पालाय स्वाहा । पाद्मे । ओं शब्दमूर्तये शङ्खाय फट् । शेषसंहितायाम् ॥

शार्ङ्गमन्त्रः— ओं कल्पान्तानिलघोषाय विद्युल्लसितप्रभाय शार्ङ्गाय फट् ।

शुक्लयजुर्वेदः— इयं शुद्धयजुश्शाखा प्रथमेत्यभिधीयते । मूलशाखेति चाप्युक्ता तथा चैकायनीति च ॥ अयातयामयजुषा तथा मोक्षैकसाधिका । इत्याद्यनेकनामानि संत्यस्या स्तत्रतत्र वै ॥ कात्यायनीयमहिमादर्शे ।

शाटकं— वस्त्रविशेषः । नारदीये । शाटकद्वितयं दद्याच्छिरोदेहस्थवारिहृत् ।

श्रीवत्समन्त्रः— ओं सर्वलक्षणसंप्रदाय श्रीवत्साय नमः । सात्वते ।

श्रीकराष्टाक्षरं— ओं उत्तिष्ठ श्रीकर स्वाहा ।

अलक्ष्यमितरैर्जनैः— पूजाकाले तु सर्वत्र भूषामाल्याम्बरार्पणम् । विसर्जनश्च तेषां वै तथा चाभ्यवहारिकैः ॥ भोगैरभ्यर्चनं चैव इतराऽलक्ष्यमाचरेत् ॥

आत्मात्मनिवेदनं— दासोहं ते जगन्नाथ सपुत्रादिपरिग्रहः । प्रेष्यं प्रशाधि कर्तव्ये मां नियुंक्ष्व हिते सदा ॥

आत्मव्यूहः— एषाकृतिरेषभगवानित्यादिमन्त्रः ।

षट्कर्माणि— अध्यापनं चाध्ययनं यजनं याजनं तथा । दानं प्रतिग्रहश्चेति षट्कर्माणि चतुर्मुख ॥

षडासनं— विहगेन्द्रे । मन्त्रासनं तथा स्नानमलङ्कारं सुभोजनम् । यात्रासनं तथा शेते षडेते देवतार्चनम् ॥

संमुखीकरणं— अभिमुखीकरणं । उत्तानमुष्टियुगळी संमुखीकरणी मता । इत्यगस्त्यसंहितायाम् ।

सभाजयित्वा— पूजयित्वा ।

सप्तजिह्वा– काळी कराळी सुमना लोहिता धूम्र एव हि। स्फुलिङ्गिनी विश्वरूपी सप्तजिह्वाः प्रकीर्तिताः ॥

समचतुष्टयं– प्रतिमा चैव तत्पीठं प्रासादो गर्भमन्दिरम् । विग्रहं देवदेवस्य चतुष्टयमिदं समम् ॥

समाधाय– ध्यात्वा इत्यर्थः ।

सङ्कल्पः– कर्मस्थलं तथा वर्षमृतुमासस्तथायनम् । तिथिर्वारं च नक्षत्रं योगं करणमेव च ॥ उक्त्वा कर्म करोमीति चोक्तिः सङ्कल्प उच्यते ॥ विष्वक्सेने ।

सङ्कर्षणः— संकरिष्यसि भूतानि कल्पे कल्पे पुनःपुनः। ततस्सङ्कर्षणः प्रोक्तो तत्त्वज्ञानविशारदैः ॥

सङ्कर्षणमन्त्रः— ओं नमो भगवते ह्रौं सङ्कर्षणाय स्वाहा । पाद्मे ।

स्वतन्त्रालयः— विष्णवालयं पुरा कृत्वा पश्चाद्ग्रामादिकल्पनम् । स्वतन्त्रमिति विज्ञेयम् ।

स्वप्नाधिपतिमन्त्रः— जयाख्ये। ओंकारः प्राक्ततः प्राणाः लोकेशोपरि संस्थितः । तदूर्ध्वं व्यापकं चान्द्री ह्रींकारस्तदनन्तरम् ॥ स्वप्नाधिपतये दद्यात्पदं चाथ षडक्षरम् । रजनीश्वराय शब्दं वै विष्णवेत्यक्षरं ततः ॥ स्वाहासमन्वितो विंशत्यक्षरस्स्वप्न-मन्त्रराट् । उद्धृतमन्त्रः— ओं ह्रौं भं टं ह्रीं स्वप्नाधिपतये रजनीश्वराय विष्णवे स्वाहा । पाद्मे । ओं ह्रौं भं टं ह्रीं स्वप्नाधिपतये रजनीश्वराय विष्णवे स्वाहा ।

हेतिराजमन्त्रः— ओं नमो भगवते सुदर्शनाय एहि चक्रराजाय ज्वल हुं फट् स्वाहा । पाद्मोद्धृतं ।

हरिणाननमुद्रा— पाद्मे । मध्यमानामिकाभ्यां तु अङ्गुष्ठाग्रेण संगतिः। कनिष्ठातर्जनीयुग्मं दीर्घीकृत्य यथातथम् ॥ तिलव्रीहियवादीनां होमकर्मणि शस्यते ॥

होममुद्रा— चरूणां सूकरी मुद्रा आज्ये मृगमुखी तथा । समिधो हंसमुद्रेति होममुद्राः प्रकीर्तिताः ॥ सूकरी करसंकोची मृगी मुक्तकनिष्ठिका । हंसी मुक्तकतर्जन्या होममुद्राः प्रकीर्तिताः ॥

क्षणिकं— चक्राब्जमण्डलं कुम्भस्सोदकस्सूत्रवेष्टितः । बीजं पिष्टं तथा चान्नं फलं पुष्पं जलं तथा । गन्धं वेदिश्शक्तकूर्च-मित्यादि क्षणिकं स्मृतम् ॥

मात्रा—जानु प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम् । यत्करोत्यङ्गुलि-स्फोटं तावन्मात्रां विदुर्बुधाः ॥

मन्त्रस्य दशाङ्गानि— बीजं प्राणश्च शक्तिश्च दृष्टिर्वेश्यादिकं तथा । गायत्रीमन्त्रयन्त्राश्च प्राणस्थापनमेव च । भूतदिक्पालबीजानि मन्त्रस्याङ्गानि वै दश ॥ पराशरे ।

अष्टाङ्गपूजनं— जयाख्ये द्वाविंशे, श्रीप्रश्ने एकोनत्रिंशे, पारमेश्वरे च । अन्तःकरणयागस्तु यावदात्मनिवेदनम् । तदाद्यमङ्गयागस्य । पूजनं चार्घ्यपुष्पाद्यैर्भोगैर्यदखिलं मुने ॥ बाह्योपचारैस्तद्विद्धि भोगसंज्ञं तु नारद । मध्वाज्योक्तेन दध्ना वै पूजा च पशुनापि वा ॥ तत्तृतीयं हि यागाङ्गं तुर्यमन्नेन पूजनम् । निवेदितस्स यद्दानं पूर्वोक्तं विधिना मुने ॥ संप्रदानं तु तन्नाम यागाङ्गं पञ्चमं स्मृतम् । वह्निसंतर्पणं षष्ठं पितृयागस्तु सप्तमः ॥ प्राणाग्निहवनं नाम्ना त्वनूयागस्तदष्टमम् ॥

दशविधमृत्तिका—पाद्मे क्रियापादे षष्ठे । शैले ह्रदे पुण्यतीर्थे वल्मीके कर्कटाशये । नद्यां वृषवृषाणाग्रे दन्तिदन्ते पयोनिधौ ॥ हले चैतेषु संभूता प्रशस्ता मृत्तिका दश ॥

अष्टबन्धनं—मयमते । चूर्णं सार्धैकभागं स्यात् भागैकं गुग्गुळं भवेत् । अर्धभागा भवेल्लाक्षा कावीयं तु तदर्धकम् ॥ मधूच्छिष्टं तदर्धं तु तूलनीयं यथामति । नवनीतं यथायोगं द्रव्याण्यष्टौ

चतुर्मुख ॥ पाद्मे । लाक्षा सर्जरसं चैव गुग्गुळं च गुळं तथा ॥ सर्वेषामर्धतस्तैलं पाचयेन्मृदुवह्निना । घनचूर्णं मधूच्छिष्टं कुरविन्दं च गैरिकम् ॥ एकैकं च समांशेन ग्राह्य सर्ज्जरसं तथा । तैलेन पाचितं सार्धमष्टबन्धनमुच्यते ॥

अग्नेरङ्गानि– ऐन्द्रे अग्निशिरः प्रोक्तं जङ्घे वायव्यनैर्ऋते । हस्तौ चैशान्यमाग्नेयमुदरं कुण्डमुच्यते ॥ यत्र काष्ठं तु तच्छ्रोत्रं यत्र धूमस्तु नासिका । यत्राल्पज्वलनं नेत्रं यत्र भस्मस्तु तच्छिरः ॥

आत्माष्टगुणाः— दयाक्षान्तिरनसूया शौचमनायासो मङ्गळमकार्पण्यमस्पृहेति गौतमधर्मे ।

आचार्यदीक्षा— आचार्यदीक्षा द्विविधा निर्बीजा च सबीजका । तन्त्रान्तरे त्वागमे च सिद्धान्ते तन्त्रसंज्ञके ॥ तेषु पूजाप्रवृत्तानां दीक्षा निर्बीजसंज्ञिका । अन्येषां दीक्षाकरणे तेषामनधिकारिता ॥ अतो निर्बीज इत्युक्तं विद्वद्भिः कमलेक्षणे । सबीजं मन्त्रसिद्धान्तदीक्षाक्रममुदीर्यते ॥ चतुर्वेदोक्तमन्त्रैश्च मन्त्रैरेकायनस्थितैः । मन्त्रसिद्धान्तविधिना मदुक्तेन च गोत्रिणा ॥ वृद्धेनाचार्यरूपेण दीक्षितो यः पुरा मया । या दीक्षा क्रियते तेन सा दीक्षा तु परा स्मृता ॥ दीक्षां परां तु प्राप्यैव पूजयेदालयेषु वै ॥ इति श्रीप्रश्ने ।

आसनमन्त्रः– ओं अखिलजगदाधाराय कूर्मरूपिणे अनन्तपद्मनाभाय हुं फट् स्वाहा । शेषसंहितायां ।

खारी– गुञ्जद्वयेन माषं स्यान्निष्कं माषस्य विंशतिः । निष्काष्टके पलं विद्यात्तन्मुष्टिः परिचक्षते ॥ चतुर्मुष्टिस्तु कुडपं प्रस्थं तस्य चतुर्गुणम् । तद्द्वयं शिवमित्युक्तं द्रोणं तस्य शिवद्वयम् ॥ द्रोणद्वयं तथा खारी भारं खारित्रयं भवेत् ॥ कपिञ्जले ।

चतुर्विध दास्यं— पतिभार्यादिसंबन्धं पितृपुत्रादिकं तथा । स्वामि-भृत्यादिसंबन्धं शिष्याचार्यादिकं तथा ॥ एतच्चतुर्विधं दास्यं विष्णोः प्रीतिकरं सदा ॥ पाराशरे ।

पवित्रं— त्रिभिर्दर्भैश्शान्तिकर्म पञ्चभिः पौष्टिकं तथा । चतुर्भिश्चाभि-चारं तु कुर्वन् कुर्यात्पवित्रकम् ॥ देवकार्ये त्रिभिर्दर्भैरेकेन पितृकर्मणि । द्वाभ्यां मनुष्यकार्ये तु पवित्रं कारयेद्बुधः ॥

पञ्चशुद्धिः— पूजाकाले पुरा कुर्यात्पञ्चशुद्धिं गुरूत्तम । स्थानशुद्धिं पात्रशुद्धिं बिम्बशोधनमेव च । आत्मनो भूतशुद्धिं च मन्त्र-वर्णास्ततो रमे ॥ श्रीप्रश्ने ।

सजीवीकरणं— प्राणभूतानि कर्माणि करणानि त्रयो गुणाः । प्राग्वा-सना अविद्या च लिङ्गं पुर्यष्टकं स्मृतम् ॥ प्राणाः दशप्राणादि-वायवः । भूतानि पृथिव्यादीनि । पञ्च कर्माणि इष्टस्य प्राप्तये अनिष्टविघाताय यानि क्रियन्ते तानि करणानि ज्ञानकर्मे-न्द्रियमनोबुद्ध्यभिमानानि । गुणाः सत्त्वादिकृतम् । प्राग्वासना पूर्वानुभूतसुखदुःखस्मृतिहेतुभूतान्तःकरणवृत्तिः । अविद्या मूलप्रकृतिः । लिङ्गं सूक्ष्मशरीरम् । एतत्पुर्यष्टकस्य देवहृदि न्यासः । तदुक्तं विष्णुसंहितायां । पुर्यष्टकं हृदि न्यस्य तन्मध्ये पुरुषोत्तमम् । अनुग्रहकरं सौम्यं सर्वज्ञं विश्वतोमुखम् ॥ ध्यायेदेवं कृते सार्चा सजीवा जायते क्षणात् । सजीवीकरणं कुर्यान्मूलमन्त्रेण मन्त्रवित् ॥ स्फुरदग्निप्रकाशेन व्याप्ताशेष-दिगन्तरम् । दिवाकरसहस्राभं विद्युत्सङ्घातसप्रभम् ॥ वामनाड्या निर्गमय्य स्वदेहात्तु विचक्षणः । ब्रह्मरन्ध्रेण तं देवं प्रविशन्तं विचिन्तयेत् ॥

पाञ्चरात्रं— श्रीप्रश्ने । रात्रिरज्ञानमित्युक्तं पञ्चेत्यज्ञाननाशकम् । तच्छास्त्रं पाञ्चरात्रं स्यादन्वर्थस्यानुरोधतः ॥ पौष्करे ।

पुराणं वेदवेदान्तं तथान्यत्साङ्ख्ययोगजम् । पञ्चप्रकारं विज्ञेयं यत्र राज्यायते द्विज ॥ फलोत्कर्षवशेनैव पाञ्चरात्रमिति स्मृतम् । गोतमे । प्रथमं ब्रह्मरात्रं तु द्वितीयं ऋषिरात्रकम् ॥ तृतीयमिन्द्ररात्रं तु चतुर्थं नागरात्रिकम् । तद्बृहस्पतिरात्रं तु पञ्चरात्रमिति स्मृतम् ॥ ईश्वरे । पञ्चापि पृथगेकैकदिवारात्रं जगत्प्रभुः । अध्यापयामास यतस्तन्मुनिपुङ्गवाः ॥ शास्त्रं सर्वजनैर्लोके पञ्चरात्रमितीर्यते ॥ नारदपञ्चरात्रे । रात्रं च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम् । तेनेदं पञ्चरात्रं च प्रवदन्ति मनीषिणः ॥ विश्वामित्रे । पञ्चेन्द्रियाणि विषयाः पञ्चभूतानि तद्गुणाः । पञ्चशब्दाभिधायीनि विद्वांसो व्याचचक्षिरे ॥ रा इत्ययमपि प्रोक्तो यातुराधारवाचकः । विषयेन्द्रियभूतानामाधारा इति पञ्च राः ॥ मनुष्यपालनात्तेषां पञ्चरात्रमिति स्मृतः ॥ कपिञ्जले । पृथिव्यादीनि तत्त्वानि गुणाः पञ्च महामुने । रात्रयो देहिनः प्रोक्ता अविद्या चैव तत्त्वतः ॥ तेभ्यो विलक्षणं विष्णुं भुक्तिमुक्तिप्रदायकम् । दर्शयन्ति च ये ग्रन्थाः पञ्चरात्रं प्रकीर्तिताः ॥ पाद्मे । पञ्चेतराणि शास्त्राणि रात्रीयन्ते महान्त्यपि । तत्सन्निधौ समाख्यासौ तेन लोके प्रवर्तते ॥ चन्द्रतारागणं यद्वच्छोभते नैव वासरे । तथेतराणि शोभन्ते पंचेनैवास्य संनिधौ ॥ पंचत्वमथवा यद्वद्दीप्यमाने दिवाकरे । ऋच्छन्ति रात्रयस्तद्वदितराणि तदन्तिके ॥ यतः पंच इतराणि शैवादीनि तन्त्राणि एतत्सान्निध्येन रात्रीयन्ते, यथा चन्द्रतारकादीनि ज्योतींषि वासरे न प्रकाशन्ते तथैव तस्मिन् सति तानीति यावत् । अथवा पंचेति भावप्रधानो निर्देशः पंचत्वमित्यर्थः । प्रळय इति यावत् । पंच पञ्चत्वं रात्रीणां यस्मात्तत् पंचरात्रं यत्र दीप्यमानदिवाकराद्रात्रयः प्रळयमधिगच्छन्ति । तस्मादितराणि

तन्त्राणि प्रतीयन्तेत्यर्थः ॥ भारद्वाजे । अहिर्बुध्न्ये । तत्पर-व्यूहविभवस्वभावादिनिरूपणं । पांचरात्राह्वयं तन्त्रं मोक्षैक-फललक्षणम् ॥ भगवद्भक्तिरेव स्याद्भक्तानां मुक्तिकारणम् । तद्भक्तिबोधकं शास्त्रं पांचरात्रागमं स्मृतम् ॥ इति पुरुषोत्तम-संहितायाम् ॥

इति मुख्यशब्दार्थविवरणं सम्पूर्णम् ॥

ग्रन्थश्च समाप्तः ॥

